विधिरसायनग्रंथारंभोयं

१६२५



श्रीगणेशायनमः॥ उद्घाट्ययोगकलयाहृदयाब्जकोशंधन्येश्चिरादपियथारुचिमुत्स्वमाणाः॥ यःस्करस्यविरतंप
पूर्णरूपःश्रेयःसमेदिशतुशाश्वतिकंमुकुंदः॥१॥जन्मस्थेमलयंसमस्तजगतांयस्यैवलीलायितंयस्मिन्नायतनेत
भवस्थिरमहाश्पाशक्षयःप्राणिनां॥तद्वंद्याद्यिरप्यगम्यविभवंविश्वाधिकंशाश्वतंसांबंब्रह्मरसात्मूलरशिकंप
श्येयमंहरिशा॥ यत्कुमारिलमतानुसारिणानिर्मितंविधिरसायनंमया॥पद्यरूपमनतिस्फुटाशयंतत्करस्वागतये
विरच्यते॥प्रारिप्सितप्रकरणाविघ्नपरिसमाप्तयेसूत्रकारस्यमहर्षेरनुस्मरणरूपंमंगलमाचरन्नेवप्रकरणारंभं-
तावदाक्षिप्यसमाधत्ते॥विख्यातामुनिवर्यसूक्तिषुविधास्तित्रोविधिस्तोनतत्रैनानोदाहारैर्णेस्फुटाः प्रविशदीक
र्तुंप्रवर्तनामहे॥मुनिवर्यस्यभगवतोजैमिनेःसूत्रेषुविधाःअपूर्वविधिर्नियमविधिःपरिसंख्याविधिश्चेतिचप्रदर्श
दैःपरस्परासंकीर्णविषयतयास्पष्टमेवप्रतिपादिताः॥तत्रस्वतएवनिरवद्येग्रंथकारेश्ववहुमिर्निष्कर्षेप्रापिते॰पूर्व
विध्यादिविभागेनूतनंकिंविदिचारणीयंनास्तेवयद्यप्येवंतथाप्यपूर्वविध्यादीनांद्वादशस्वप्यध्यायेषुविप्रकी-
र्णैरिहापूर्वविध्यादिलक्षणविचारव्याजेनतत्रप्रतन्यप्र

दर्शनीयेरस्तरणविशेषैस्तमेवार्थंस्पष्टीकर्तुंप्रकरणमिदमारभ्यतइत्यर्थः॥विधिरत्यंतमप्राप्तेनियमःपाक्षि
केसति॥तत्रचान्यत्रचप्राप्तौपरिसंख्येतिगीयतइतिश्लोकेनचार्थेरपूर्वविध्यादीनांलक्षणमुखेनविभागः
कृतःतत्रव्रीहीन्प्रोक्षतीत्यपूर्वविधिःएतदभावेदर्शपौर्णमासिकेषुप्रोक्षणंकर्यंचननप्राप्नोतिव्रीहीनवहं
तीतिनियमविधिःएतदभावेपुरोडाशार्थमुपपातेषुव्रीहिषुतुषविमोकेलोकप्रसिद्धकारणंनातदाक्षिप्तत
यावघातःप्राप्नोत्येव॥किंतुलोकप्रसिद्धकारणस्यविशेषात्तुषनिदलनमपिप्राप्नोतीतिपाक्षिकीतस्या
क्षेपतःप्राप्तिःइमामगृभ्णन्नामतस्येत्यस्याभिधानीमादत्तइतिपरिसंख्याविधिःएतदभावेपिइमामगृ
भ्णन्नामतस्यैतमंत्रलिंगात्कृष्णेचयनप्रकरणस्थोमंत्रस्तत्रत्यश्चरशब्दोनागृह्णेनितमेवनप्रा
प्नोतिकिंतुलिंगाविशेषात्तत्रैवगर्भैरशब्दानाग्रहणेपिप्राप्नोतीतितत्रचान्यत्रचप्राप्तिः॥यद्यपिनियम
विधिपरिसंख्ययोपासिकेनियताप्राप्तिर्वस्तुतोनास्तेवतुषविमोकेनकार्यंणक्षिप्तयावघातस्यपा
क्षिकीप्राप्तिर्वक्तव्या॥आक्षेपाल्लाघवंव्रीहीनवहंतीतिप्रकृतशास्त्रंसडितिप्रवर्त्ततेतदनंतरंप्रकृतशा
स्त्रसिद्धेनकेनोपायेननेराकांक्ष्यादनीयतोपायाक्षेपएवनप्रवर्त्तते॥एवंप्रत्यक्षशास्त्रेणचरसनाग्रहे
णसडितिविनियुक्तस्यमंत्रस्यतेनैवनेराकांक्ष्याद्दर्शनाद्दृश्यसाधारण्येनलैंगिकविनियोगकल्पनेनप्रवर्त्त

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

तो एवं च नियमपरिसंख्ययोरप्यपूर्ववत्वस्तुतोसतां प्राप्त एव विषयः॥ तथापि नियमपरिसंख्या शास्त्रयो
रप्रवृत्तावर्थादाक्षेपेण नखविदलनस्यापि कदाचित्स्याज्जघातस्यापि पक्षिकीएव प्राप्तिःस्यात्। मंत्रस्यावलिंगविशेष
णगर्दभरशनाग्रहणेऽपिविनियोगःस्यात्ततयोः प्रवृत्तावाक्षेपमंत्रलिंगावतारप्रतिबंधात्जघातस्यनियमो मंत्र
स्यगर्दभरशनातोनिवृत्तिश्चलभ्यतेइतिनियमपरिसंख्ययोः प्रवृत्तावपूर्वविध्यविशेषेष्वाक्षेपमंत्रलिंगप्रतिबंध
द्वाराचप्राप्तनियमेनगर्दभैर्दशनाया मेत्रवर्जनेनचफलवत्वाफलतोनियमपरिसंख्याव्यपदेशाद्यत्पूर्वविधिः
तत्तयोर्भेदः॥ यच्चपिनियमेनखविदलादिनिवृत्तिःपरिसंख्यायागर्दभरशनानिवृत्तिश्चेतरनिवृत्तिलाभ
यत्राप्यविशिष्टःअवघातेनैवतुषविमोकाकार्यः अश्वरशनायामेवमंत्रविनियोगःकार्यइत्येवंकारेणफल
विवरणमप्यशिष्टंतथाप्यवघातशास्त्रेणावघातनियमस्याक्षेपतोवघातप्राप्तपशुसंस्कारेणोपयोगतस्सा
धारणेनाक्षेपेणपादतःउपयोगस्यानिराकर्तुमशक्यत्वात्॥ तन्निदर्शनेनेयमेवनियमस्यप्रथमोपस्थितत्वाद्वि
धेयगतत्वेनप्रयासन्नत्वाच्चाप्राप्तांशपरिपूर्णरूपोनियमएवफलं॥ उपयोगतरनिवृत्तेश्चरमोपस्थितत्वाद्वि
धेयगतत्वेनविप्रकृष्टत्वाच्चतदनुनिष्पादनीनफलं॥ परिसंख्योदाहरणेतुद्वयोरपिनित्यप्राप्तिसंभवेनस्वरू
पप्राप्तेर्नियमस्यवाफलत्वायोगादितरनिवृत्तिरेवफलंनियमपरिसंख्याविध्योःफलभेदेससैवकारेणफल

२

विवरणमेकत्रायोगव्यवच्छेदार्थमन्यत्रान्ययोगव्यवच्छेदार्थमितिविशेषोद्रष्टव्यः॥ एवमाचार्यश्लोकंमनसिनिधाय सूत्रं
श्रितार्थानासेपसमाधानाभ्यांविचारयितुंतदुक्तंमपूर्वविधिलक्षणंतावदासिंपति॥ अत्यंताप्राप्तियुक्तोविधिरितिविष
यसप्तमिवर्णयतेचेदव्याप्तिःप्राप्तियुक्तंक्रियायमुपगतेघग्निविध्यादिषुस्यात्॥ अथेदृष्टेवसप्तम्यविषयगतयेयो
ज्यतेचेत्यनीकाभाजोरथत्वविध्योःप्रथमपदजुषोस्यात्तदाव्याप्तिदोषः॥ अत्यंतमप्राप्तोविधिरित्यपूर्वलक्षणंतदयु
क्तं॥ अत्रत्यप्राप्तइतिविषयसप्तमीसतीसप्तमीवास्यात्॥ आद्येयोविधिविषयत्वेनान्वेति॥ तस्यचायंताप्राप्तिर्व
क्तव्याद्वितीयेविषयस्यप्राप्तिसत्वेपितदन्यस्ययस्यकस्यचिदप्राप्यालक्षणमुपपद्यतइतिविशेषःतत्रविषयं
सप्तमीतिपक्षेविधिविषयस्वरूपेणाप्राप्तिर्विवक्षिताउतोद्रव्यकसंबंधित्वेनआद्येयएवंविद्वानग्निंचिनुतेअ
ग्निहोत्रंजुहोतिदधिमधुघृतंपयोधताज्यंकृतंतंडुलोस्तसंस्कृतप्रजापतिसाद्विधिभिःस्वरूपेणप्राप्तान
मन्याग्निहोत्रप्राजापत्ययागानांक्रतुनिमित्तफलसंबंधार्थंषुअथातोग्निमग्निष्टोमेनानुयजेतियावज्जीवम
ग्निहोत्रंजुहुयात्चित्रयायजेतपशुकामइत्यादिषुलोकतःस्वरूपेणप्राप्तानांविदेवनादीनांराजसूयसंबंधार्थे
घृक्षेदीक्षितीत्यादिविधिषुचाव्याप्तिःस्यात्तृतीयेतुघग्निविधिषुअतिग्राह्यविधिषुचाव्याप्तिस्यात्॥ तथा
हीयएवंविद्वानग्निंचिनुतइतिप्रकृतमश्रूयते॥ अथातोग्निमग्निष्टोमेनानुयजेतिएतमुक्थ्येनतंद्विरात्रेणतंत्रिरात्रेणो

त्यादित्राग्नेचिनुमइतिचयनेनाग्निंसंस्कुर्यादित्यर्थः॥चयननिष्पादितेस्थंडिलेअग्निंस्थापयेदितियात्॥स्थंडिलेनिष्पादितस्यचयनस्यसाक्षादग्निसंस्कारकत्वायोगात्अथातोग्निमित्यादेश्चचयननिष्पादितेस्थंडिलेआहवनीयाग्निस्थापनानंतरंतस्मिन्नग्निष्टोमादिभिर्यजेतेत्यर्थः॥तथाअतियाज्यानामकेचनग्रहाःतानधिकृत्यश्रूयतेउक्थेगृह्णीयाद्विश्वजितिग्राह्याइत्यादिः।तत्राग्निस्तावत्प्रकृतावप्यस्तिअग्निष्टोमेनानुयजेतेतिविधानात्॥नचप्रकृतेःप्राकरणीकोत्तरवेद्यवरोधातत्रानारभ्याधिहितोग्निर्नेनिवेष्टुमर्हतितत्राग्निष्टोमपदंविकृत्यग्निष्टोमंपरंवाक्यंप्रकरणेनबाध्यतेक्रत्वाधासंयोगात्॥नचसप्तदश्यासन्निधेर्नुक्रयादिवानारभ्याधीतंसप्तदश्यंप्राकरणीकपांचदश्यावरोधात्प्रकृतेर्दर्शपूर्णमास्ययोर्नवश्रमलभमानेमित्रविंदादिविकृतिगामिविहितंएवमग्निनावेश्यादितिवाच्यं॥सप्तदश्येहिसन्निधेःसंबंधोवाक्येनावगम्यतेक्रतुसंबंधस्तस्यवैय्यर्थोपरिहारायमव्यभिचरितक्रतुसंबंधिसन्निधेर्लिंगेनक्रतुहृदयमागमध्यकल्पयितव्यः॥पांचदश्यस्यप्रकरणनश्यात्स्वतएवबलीयोविपरिवर्तमानेनक्रतुसंबंधःकुप्तइतियुक्तमेवतत्रप्राकरणीकस्यबलवत्त्वेदृढत्वग्निष्टोमशब्दःक्रतुमेवाभिधत्तइतितत्संबंधेवाक्येनबाधोनयुक्तःतस्मादनारभ्याधीतोप्यग्न्याधारस्थंडिलस्थोग्निःप्रकृतावाम्नातयोत्तरवेद्यविकल्पितःप्रकृतौनिविशतइत्यस्तितत्रतस्थापनेनसंस्कृताहवनीयोग्निःप्रकृतौए ३

वमतिग्राह्याअपिउपरिष्टान्नेष्टेरारभ्यतदस्यपदतिग्राह्याइतिप्रकृतौविकृतौविहिताःसतिप्रकृतौसंतश्चाग्न्यतिग्राह्याःसर्वासुविकृतिषुअतिदेशादेवप्राप्नुवंतीतिकासुचित्तेषांश्रवणंनतत्रास्यार्थेकिंतुतदाश्रितगुणकामादिप्राप्त्यर्थंःअन्याश्चाश्रिताःगुणकामाःश्रूयंतेयेनचितंचिन्वीतसुवर्गकामाइत्यादयस्तेचोद्भिदाकल्पेनबाकांक्षाकल्पितास्तान्निःनत्वंगाश्रितानांफलार्थगुणानांतयानिर्णीतंचाष्टमाध्यायेगुणकामेष्वाश्रितत्वाप्रकृतिस्थात्निवृत्तिर्वाकर्मभेदादितिपूर्वोत्तरपक्षसूत्राभ्यांएवंचाग्न्यतिग्राह्याणांप्रकृतौकासुचिद्विकृतिषुचोपदेशेनतासांप्रकृतेश्चसामान्यविधेसंतितदाश्रिताःफलार्थेगुणाप्रकृताविवतासुविकृतिष्वपिप्राप्नुवंतिनचप्रकृतावग्नेःस्तरवेद्यांतोविकल्पितत्वाद्विकृतिष्वपिउपदेशस्तन्नियमार्थोस्तिवाच्यंअनारभ्याधीतमग्निप्रकृत्यहिअथातोग्निमग्निष्टोमेनेत्यादिर्विधिर्वाक्यंतस्यप्रकृतिविकृतिरूपक्रतुसंबंधःक्रियतेनतुततक्रतुप्रकरणेततश्चविकृतिष्वप्युपदेशस्यप्रयोजनाकांक्षायाअग्निप्रकरणात्तत्रतयासन्निहितानांदाश्रितगुणकामानांप्राप्तिःप्रयोजनमितिवक्तुंयुक्तंनत्वसन्निहिततन्महिकृतिप्रकरणव्यवस्थापितात्उद्भिदाकृगणप्राप्तयोत्तरवेद्याआग्नेयाश्चकल्पप्रसक्त्यपेक्षस्तन्नियमःप्रयोजनमितिकल्पयितुंनचवाच्यउत्तरेहनिरात्रस्यगत्वातइतिसर्वेषांहिरात्राणांमतिरात्रसंस्थेहीतीयेहनिषोडशीग्रहनियमोविधिपित्तत

द्विरात्रप्रकरणव्यवपितत्वतचोदकगणप्राप्तेषणषोडशीग्रहणाभावेनषोडशीग्रहेस्यपाक्षिकत्वप्रसक्त्यपेक्षोदृ
ष्टस्तथेहापिस्यादितित्रसंनिहितप्रयोजनालाभेनागत्यातथाकथनात्दूरस्तंनिहितबुद्धिविपरिवर्तनमार्ग
प्रयोजनसंभवेदूरस्थितंबुधावपिवर्त्तमानविशंकलितप्रनेकबोधकानुसंधानसापेक्षमदर्थंहृदयमागम्य
प्रयोजनकल्पनानौवचिस्यात्॥एतेनद्विरात्रादिषुचोदकात्प्राप्तानांमंगांतराणांनिवृत्यर्थंद्विरात्रादिष्वग्निरं
गांगांगांतरिणीतिवाद्विरात्राद्यतिरिक्तविकृतिषुचोदकाप्राप्तस्याग्नेर्व्यावृत्यर्थंद्विरात्रादिष्वग्निर्नान्या
विकृतिष्वितिवापरिसंख्याविधिरस्तितिशंकानिवृत्तातत्करणसन्निधाद्यपेतप्रयोजनसंभवेद्विरात्रादिषु
दकपर्यालोचनालभ्यस्यवाविकृत्यंतरचोदकपर्यालोचनालभ्यस्यवाप्रयोजनकेवल्यनायोगात्प्रकृत
सप्रानविधानस्यचोदकपरिसंख्यानानुपपत्तेश्चतथाहिनतावदंगांतरपरिसंख्योपपद्यतेसाहिगृहमेधीयो
धिकरणपरंचमपक्षन्यायाचोदकप्राप्तपरिसंख्यावास्यात्॥तदष्टमपक्षन्यायाच्चोदकपरिलोपकत्वेनाप्राप्तरूप
संख्यावाद्यःनेष्टाग्निविधानकालएवप्राकृताग्निविधिर्निष्पाद्यमानतयातत्पूर्वकास्याग्निअंगांतरसाधारणस्य
चोदकस्यतदानीमालंभाभावेनतःप्राप्त्यभावात्प्राप्तपरिसंख्यातेस्वार्थत्यागःपरार्थग्रहणंप्राप्तबाधश्चेति दो
षत्रयापत्तेश्चप्रागेवचोदकतःप्राप्तेत्यग्निर्नविधातव्यःचोदकप्राप्तनिअंगांतराणिस्वयमेवनानुवर्त्तनइतिप्रति

षेध्यानिष्टतोवेष्टताग्निविधिश्रवणस्याग्निविधिरूपस्वार्थपरत्वंसलक्ष्यंअंगांतरनिवृत्तिरूपपरार्थेलक्षकत्वंचांगा
करणीयंचोदकप्राप्तानिचांगांतराणिबाधयितव्यानियद्दिहिरण्यादोपरिसंख्याविधिवदप्राप्तपरिसंख्यास्या
त्तथैवविधिश्रवणस्यप्रागप्राप्तस्वार्थविधायकस्यतेनैवनैराकांक्ष्यमापाद्यविधेयपरिसंख्ययासाधारण
प्रमाणप्रवृत्तिप्रतिबंधकतयाफलतःपरिसंख्यात्वमितिदोष्यंनापद्यतेऽप्राप्तपरिसंख्यातिद्वितीयपक्षोपि
नोपपद्यतेगृहमेधीयेहिज्याभागौयजतीदर्शपौर्णमासिकयोराज्यभागयोश्चोदकासंभवत्प्राप्तिकयोःपु
नःश्रवणस्यानुपकाराज्यभागसंबंधेनगृहमेधीयप्रयोगविधेर्नैराकांक्ष्यमापाद्यचोदकल्पनामीतिबंधकत्वेन
गृहमेधीयस्यप्राकृतिरहितरूपापूर्वतोपरमिसंगीकृतनचेहप्रकृताग्निविधेःकुतोपकारनास्तिप्रकृता
ग्निविधेरपिवैकृताग्निविधानकालेएवनिष्पाद्यमानत्वात्अतएवैकृतांतरपरिसंख्यातिपक्षोपिनोपगम्यते॥
द्विरात्रादेघ्रग्निविधानसमयेतत्समसमयविधानस्यप्राकृतस्यनैःविकृतेषुचोदकतःप्राप्त्यभावात्न
चतत्राप्राप्तपरिसंख्यालेशंकितुराकांक्षिद्विरात्रादिघ्रग्निविधानेनाविकृतांतरप्रयोगविधेर्नैराकांक्ष्यापाद्
नासंभवात्तन्नचचोदकसवेकांक्षुविरंपुनःश्रवणंव्यर्थमाभूदित्यग्निविषयेचोदकाभावस्तापकंसद्
र्थतःपरिसंख्यास्थितिवाच्यंअग्नेरंगांतरसाधारणस्यचोदकस्यतिवारयितुंमशक्यत्वात्अग्निमात्रे

प्रयोक्तुश्चोदकाभावात्तस्मात्प्रकृतौविकृत्यितमङ्गंयथाप्रकृतौवहिरात्रादिषुविदधानानांहिरात्रादिष्वंगांतराणिवि
कृत्यंतरेष्वङ्गंचापरिसंचक्षाणानांवैकृतानामङ्गिविधीनामतिग्राह्यविधीनांचगुणकामप्राप्तेरवघूलंतथाव्य
वस्थापितंअग्न्यतिग्राह्यस्यविकृताचुपदेशाद्प्रवृत्तेशितिदाशाग्निकाधिकरणेतत्रश्यातिदेशाप्राप्तविषयत्वेना
प्राप्तविषयत्वाभावातेषुलक्षणस्याप्राप्तिःनचतेनाभूवन्प्रवृत्तिविधयइतिवाच्यं॥अप्रमाणपरिपूरणेतरनि
वृत्तिफलरहितानामप्राप्तगुणकामप्राप्तिफलानतिषामप्रवृत्तिविघातभावावश्यंभावादेयथानियमपरिसंख्य
योरप्यनंतभावेनविधित्वेविध्यभंगापत्तेःननस्तसेतीसप्तमीतिहितीयःपक्षःनियमःपाक्षिकेसतीयत्रैतनस
तिसप्तम्यवैरूप्यलाभात्तथासतिनोत्पाद्याद्याःनचवाच्यमग्न्यादिविधिषुषुविषयस्यप्राप्तिहेपि
श्येनाकृत्यादिगुणोनप्राप्तस्वल्पव्याप्तिपरिहारंमन्यसेतद्भोतिविलसितंतस्यापिश्येनचितेचिन्वीतेत्या
दिवाक्येस्वरूपेणस्वाद्दृश्यस्वर्गादिसंबंधिनेनप्राप्तत्वादितितोन्यस्ययस्यकस्यचित्संभावितप्राप्तिमादा
यलक्षणगमनोपपत्तेः॥लक्षणीयविधुद्देश्यसंबंधित्वेनाप्राप्तिविवक्षायांतस्याप्यप्राप्तिसंभवाच्च॥न
त्वग्नेर्विकृतिसंबंधोपदेशाभावेतदाश्रितगुणकामानांविकृतिमध्येऽनुष्ठानप्राप्तिरस्तीतिचेत्उच्यते।
यस्यचभावेनभावलक्षणमितिसूत्रानुनिष्टयासतिसप्तम्यायस्याप्राप्तिर्विधिप्रवृत्ताउपलक्षणेतेन

निर्दिष्टात्प्राप्तिफलकत्वपर्यंतंलक्षणमितिविवक्षितं॥नवातदविवक्षायाअहन्यादिनियमविधिषुप्रसंगः॥दा
र्शपौर्णमासिकंकृत्स्नंागकलापोपदेशोपतीविपाशुकचोदकाधानप्रसक्त्यपेक्षेनतोपदेशोकरातीत्याज्यभागनिषे
धेऽक्तचोदकाधीनप्रयाजादिप्राप्त्यपेक्षएकादशप्रयाजान्वतीतिशास्त्रविहितप्रयोजनकादशत्वादिगुणेचसो
द्देश्यमप्राप्तएवाज्यधर्मेविलेपनादौप्रकृतविधुद्देश्यमप्राप्तएवचरुहोनवरुतीत्यादिविधिप्रवृत्तेरतस्तस
द्विहारावतत्प्राप्तिफलकत्वपर्यंतमवश्यविवक्षणीयंतथासतिज्योतिष्टोमाजोराज्ययोरग्नतविध्योरन्यप्राप्तिः
तथाहिद्वादशाहेज्यनीकाम्नाताऐंद्रवायवाग्रेप्रापणीयोदयनीयेदशमंचाहरथेतरंनवानामह्नांऐंद्र
वायवाग्रंप्रथमहारथशुक्राग्रमथाग्रयाणाग्रमथैंद्रवायवाग्रमथाशुक्राग्रमथाग्रयणाग्रमथैंद्रवायवाग्रम
थाशुक्राग्रमथाग्रयणाग्रंतत्रतरेषांनवानामह्नामग्रतास्तुनीकेस्तुच्यंतेत्रयाणामैंद्रवायवशुक्राग्रयणाग्र
तारूपाणामानींकानांसमाहारइतिद्युप्तेतेःअत्रत्र्यनीकानामाद्येअहनीबृहत्सामरथंतरसामानीत
योरैंद्रवायवशुक्राग्रतेप्रकृतितोज्योतिष्टोमादेवप्राप्तेः।ज्योतिष्टोमेहियद्दिरथंतरसामासोमस्यादैंद्रवा
यवाग्रान्गृह्णीयाद्यद्बृहत्सामाशुक्राग्रानितिरथंतरसामलेनबृहत्सामलेनचानिमित्तेनतयोरग्रत
योःश्रुतयोर्विहितत्वात्॥एवमतिदेशप्राप्तयोरपिविधानमेनेमित्तिकत्वार्थंतस्यप्रयोजनंनहिकृतिषस

त्यपि स्थे तरबृहत्साम होनिमित्तेनैंद्रवायवशुक्राग्रताप्राप्तिः तथा गर्गत्रिरात्रेद्वितीयमहर्वासदेव्यात्रबृहत्साम लाभावे
प्यनोमतिकोशुक्राग्रताद्वाद्वाहनोऽतिदेशात्प्राप्नोतितदेवतत्सर्वज्यानीकायान्यायोक्तिघात्मानंगुणार्थस्यादितिदा
ग्निकाधिकाधिकरणेनिरूपितेएवंचसतिऐंद्रवायवशुक्राग्रतारूपेविधेयेतत्रकृतविध्युद्देश्यद्वाद्शाहिकमा
ध्यमहर्षयेअप्राप्तसतिप्राप्त्यर्थेऐंद्रवायवशुक्राग्रताविधेःप्रवृत्तिनप्रभवतीत्यनिवार्यातत्रव्याप्तिःतथागवाम
यनेऽरथयोरहोरैंद्रवायवाग्रताविधीश्रूयेतेतयोरव्याप्तिःतथाहि।गवामयनेप्युक्तरूपज्यनीकाम्नातासाचे
कषष्ट्याधिकत्रिशतसुत्यालक्षस्यगवामयनस्यपूर्वस्मिन्पक्षस्यशतस्याधिकशतसुत्यालक्षेतदवान्तरप्रकरण
बलादंगत्वेननिविशतेएकयाज्यनीकापूर्वपक्षेनदृश्यतइत्यायत्तनीयाहिसातदावृत्तिश्चद्वेधासंभवतिदंडक
लितवदावृत्तिःस्वस्थानवस्थिप्यतेति॥यथाक्षेत्रमानेकर्त्तव्येकचित्कृत्स्नानदंडेनिवेश्यतेदेतेनंतरदेशेकृत्स्न
एवमानदंडोनिवेश्यते॥एवंप्रथममहर्दवायाग्रहितीयमहःशुक्राग्रमित्येवप्रकारेणकृत्स्नोज्यनीकामनुष्ठीयसा
पुनरनुष्ठीयतेचेत्पूर्वस्मिन्पक्षसिविंशतिवारंज्यनीकायादंडकलितवदावृत्तिर्भवति॥अथपूर्वपक्षनवविधा
विभज्याभ्यासेनगोविंशतिसुत्यालक्षेऐंद्रवाग्याग्रताद्वितीयेशुक्राग्रतेत्येकवारमेकानुष्ठीयतेचेत्तदंतर्गतानांज्य
ग्रतानांस्वस्थानस्थैवावधिः॥यदाऐंद्रवाग्यायंप्रथममहरित्यहर्ग्रहणंविवक्षितंतदादंडकलितवदावृत्तिर्भवति॥

६

अहःसंघातरूपयत्तभागगताश्चाग्रताःअहर्धर्मलाभावात्गावामेयिनिकपरमापूर्वप्रयुक्ताभवंति॥एवंस्थितेदा
ग्निकेएकादशानीवत्ज्यनीकापरिकल्पनिःस्यादित्यधिकरणेऽहःशब्दस्यश्रूयमाणत्वादंडकलितवदावृत्तिरितिपूर्वप
क्षंकृत्वाप्रथमस्यभागस्यादिश्यमानस्याऽहऽउदिश्यमानस्यप्राथम्येनवाविशेषणात्संभवात्॥ग्रहैकत्वे व
देकत्वमविवक्षितंकृत्वावाप्रथममहरितिवाउद्दिष्टव्यं॥तत्राहरुद्देशेऽक्रांधर्माउद्दिष्टाःस्युरयथैकदेशानु
पपत्तिःस्यात्प्रथमेमैंद्रवाप्याग्रमेप्येशुक्राग्रतेतावत्विवक्षितं॥अहःशब्दस्तुहादशाहिकज्यनीकायांप्रथ
मादिभागानांवस्तुतोहारूपत्वादनुवादःगावोमेनिकज्यानिकायांमहःसंघातपरोनुवादः॥तस्मात्स्वस्थानविधि
रितिराद्धांतितेएवंचज्यनिकाविधिबलात्॥ऐंद्रवाद्याग्रतायांमाक्रामाद्यायांविंशतौतदंतर्गतयोराद्यवोर
क्रांःपुनरैंद्रवाद्याग्रहविधानेनतदहरुद्देशपूर्वप्रयुक्तसिध्यर्थंतत्कलनुनहिकारकेक्रांहकतुपुरंध्यंतरसामसा
भावेप्यैंद्रवाद्याग्रहप्राप्तिरितिप्रतिपादितंतेनत्रलोतत्रश्रुतयोरप्यैंद्रवाद्यग्रहविध्योरनिवार्योऽव्याप्तिः॥तत्र
तत्रोद्देशेषुनिधेयानामग्रतानामुद्देशेषुद्वादशाहेगावोमेनिकेष्वहस्सुवोदकत्रितोक्षोपदेशाभ्यांप्राप्तिसहेपित
दन्येषांकेषांचिदप्राप्त्यानेषुलक्षणंसमर्थनीयमितिशंकितुंशक्यंनेषांविधीनांतत्प्राप्तिफलकत्वाभावात्॥अत्र
विषयसप्तमीपक्षेकल्पद्वयस्यापिदूषणमव्याप्तिःप्राप्तियुक्तेप्सितादिनादर्शितेतत्राद्यविकल्पदूषणंनिविधिरा

देनाप्रकृतिविकृतिसाधारणमग्नेः क्रतुसंबंधविधिमात्रं प्राप्तं। आदिशब्देनचाग्निहोत्रप्राजापत्ययागविधिर्विदेवना
दिग्राह्यः॥ द्वितीयविकल्पदूषणेग्निविधिशब्देनाग्नेर्विकृतिसंबंधविधिग्राह्यः॥ आदिशब्देनेति॥ ग्राह्यविधिः॥
सतिसप्तमीपक्षेतत्प्राप्तिफलकत्वाविवक्षायांयद्दूषणंतस्यपंचमश्लोकेप्रदर्शयिष्यमाणत्वादिहनप्रदर्शितं॥
तेहिवक्ष्यमांयदिव्याप्तिदूषणंतत्प्रयोजकाभावोरित्यादिनादर्शितं॥तत्रव्याख्यद्वारेणप्रयोजकाभावोद्दर्शयति
कृत्यनीकांतर्गतयोरिद्वाधाशुक्राग्नतविध्योरव्याप्तिरित्यर्थः॥ द्वितीयाव्याख्यद्वारेणयत्रगवामप्रमनीक्रीत्य
नीकांतत्रैवस्वयंप्रवर्त्तमानेतयाप्रयोजकाभावोद्दर्शयति॥ इद्वाव्याग्रताविध्योरव्याप्तिरित्यर्थः॥ स्यादेतत्॥सतिस
प्तमीपक्षेप्रथमपक्षेउद्भावितमव्याप्तिदूषणंनप्रसज्यते॥तथाहिहानेदर्शाहीकृत्यवीकांतर्गतमाघप्रयो
गारंभंपरमापूर्वसाधनलोपहितयोराघयोरिद्वैविधीयते॥नचतथाभूतयोस्तयोःप्रकृतितस्तदग्रताद्व
यशक्यंकिंतुनांतरापूर्वसाधनलोपहितयोरिच॥तयोरेवहादर्शांसोमयागानामेकफलत्वावच्छिन्नांस
हानुष्ठानेपिप्रतिसोमयागंचोदकस्यप्रथकप्रथकप्रवृत्तेः॥तथागवामेनिकृयोराघयोरिद्वैवांतरापूर्व
साधनलोपहितयोःऐद्वाव्याग्रताद्वयंविधीयते॥नचतथाभूतयोस्तयोःशक्यंकिंतुपरमापूर्वसाधनलोपहि
तयोरेव॥इदंचतत्तद्व्याप्युद्भावनंस्थलेस्थलेस्फुटीकृतं॥तथाचोद्देश्यतावच्छेदकरूपेणप्राप्तसत्वादुद्भावितं ७

व्याख्यानविकल्पाद्वयारोक्याह॥॥अथाप्तिप्राप्तिभंगाभावमपियदिपरमांतरापूर्वकृत्यव्यावर्तोद्देश्यधर्मेसंजासिघ
टयत्येनमव्याप्तिरोषं॥तस्मादादायलक्षणंहानिकरस्यमियमविध्यतिव्याप्तिरोषव्याघ्रस्यवदनेलक्षणंयथानि
हितंस्यात्॥व्रीहीनवहंतिप्रोक्षतियमविधावपि॥व्रीहीणामपूर्वसाधनलोपहितानामेवोद्देश्यत्वेनोद्देश्य
तावच्छेदकरूपेणप्राप्तिसत्वात्तत्रहिद्वितीयाश्रुत्यात्रीहीणामेवघातसाध्यत्वप्रतीयतेनचतेषांव्रीहित्वेन
रूपेणतत्साध्यत्वमस्तिप्रागेवसिध्यत्वात्नापिविहीनवहंतीतिलौकिकव्रीह्यवहननानुवादवाक्यइवात्रतुप
विशेषकविशिष्टत्वेनतत्साध्यत्वंद्वितीयार्थइतिवक्तुंयुक्तंविदलनेनापिसंभवतितस्मिन्नत्रविवक्षितस्यावघा
तनियमस्यानुपयोगात्॥तस्मादपूर्वसाधनत्वाकारेणैवतेषांसाध्यत्वंवाच्यं।नचयथाग्निनादग्धीतेत्रअ
ग्नीनांस्वरूपेणाधानसाध्यत्वंतथेहापिस्यादितिवाच्यं।तत्राहवनीयेजुहोतिगार्हपत्येहवींषिश्रपयतिद
क्षिणाग्नावन्वाहार्यपचनीतिवस्यांतरेहोमादिषुविनियुक्तानांसंस्कारविशेषविशिष्टाग्निरूपाणांआहवनी

यादीनांसाधनाकांक्षायांसाधनात्तेषांसंस्कारविशेषावच्छिन्नेनरूपेणाग्निपदोपात्तानांसाधनसाध्यतामु
क्त्वानचेहव्रीहयःस्वकैरविशिष्टाःक्रतोर्विनियुक्ताःयेनावहननवाक्येतिनेषांतद्विशिष्टतयोपादानात्तेनरू
पेणावहननसाध्यतायुस्यात्॥व्रीहिभिर्यजतेतिजातिमात्रेणव्रीहयःक्रतेर्विनियुक्ता॥नचात्रसकृन्न्यायेन
विनियोगभंगःकल्पनीयःअपूर्वसाधनत्वलक्षणमात्रेणप्रधानद्वितीयाश्रुतिनिर्वाह्याकांक्षितदृष्ट
लत्वेनियममात्रविषयतयाविप्लवेचसंभवतिद्वितीयाश्रुतिर्बाधास्यानाकांक्षितादृष्टफलकल्पनस्या
यंतायाप्तप्रापकापूर्वविधिगोरवाभ्युपगम्यस्यायुक्तस्यात्तत्तथैवमपूर्वसाधनत्वलक्षणायामज्यस्य
स्याहयजूंष्यस्तुवादीनामप्यवघातप्रसंगः॥व्रीहीणांह्यवेगतमपूर्वसाधनत्वलक्षणंयो॥तेषांचान्येनाद्य
पूर्वसाधनत्वंतंडुलनिरूप्यादिद्वारकंव्रीहिभिर्यजेतेतिशास्त्रेणावगतमितितल्लक्षणायांयवसाधारण्यमा
त्रलाभेपिक्वान्यत्रातिप्रसंगः।तथैवलक्षणेयंअवघातस्यदृष्टफलत्वनिर्वाहायतदेतत्सर्वंतेषामर्थेनसं
बंधइतितार्तीयाधिकरणेद्रव्यसंस्कारहेतुसमुदायेवाश्रुतिसंयोगादितिनावमीकाधिकरणेस्पष्टकरणेस्प
ष्टामितिमितिभावः॥एवप्राप्तानामपिरूपभेदाश्रयणेनाग्नेयमेष्यलक्षणानुगमनेव्रीहिपदलक्षि
तापूर्वसाधनत्वाकाराश्रयणेनअवघातेनियमविधावतिव्याप्तिरुक्ताइदानींशाब्याकाराश्रयणेनअ

न्यत्रनियमविधावतिव्याप्तिमुदाहरति॥यूपःसर्वोप्यपूर्वस्ययमेवपिविधादृष्टसंस्कारयोगात्तस्मिन्नदृश्येपिद
ष्टंखादिरनियमनंतत्रकाप्राप्तिवार्त्ता।तस्मात्तत्स्वरूपेपरमनवगंतरूपभेदंविहायप्राप्यप्राप्तीविचार्यैक्य
मपितदिहाव्याप्तिदोषान्नमुक्तिःयूपःप्राकृतोवैकृतःसर्वोपितावदाहवनीयादिवदलौकिकः॥प्रोक्षणजन्या
दृष्टछेदनतक्षणाष्टाश्रीकरणादिजन्यनियमादृष्टरूपानेकादृष्टसंस्कारविशिष्टस्यैवयूपशब्दार्थत्वात्त
च्चप्रकृतिद्रव्यनियमविधिःश्रूयतेखादिरोयूपोभवतीतित्रालौकिकयूपलावछेदेनखादिरप्राप्तभावात्॥
अपूर्वविधिलक्षणस्यतत्राप्यतिव्याप्तिःस्यात्तन्नाहानीयाद्युद्देशेनाधानविधिवद्भूतोयूपादेशेनखा
दिरविधिरपूर्वविधिरस्तुयूपोकृवनीययोरलौकिकत्वाविशेषात्खादिरादिविधेनियमविधित्वप्रसिद्धि
रूपवैकृतविधिविषयास्यात्विकृतावपितत्रतत्रश्रूयतेखादिरोयूपोभवतीतितस्यप्रकृतौविकल्पिता
नांखदिरपलाशादीनांखदिरपलाशादीनांविकृतावपितथैवचोदकप्राप्तेरखदिरएवतत्रग्राह्यइति
नियमविधित्वमुपपद्यतइतिचेदुच्यते॥देक्ष्यदीक्षासुयूपोनतीतिदीक्षाकालकर्त्तव्यछेदनेप्रकृतयूपे
खदिरविधिरपिनियमविधिरेव॥तदभावेतत्क्षणादिवाक्यपर्यालोचनयादारभ्यतेनावगतस्ययूपस्य
प्रकृत्याकांक्षानियतनेकद्रव्यापेक्षास्यानिवार्यत्वात्॥तक्षणाष्टास्त्रीकरणादिविशिष्टयूपस्यदृष्टरूपेख

दिरादीनांप्रकृतिहवेाग्यतयालाकृतेावधारितात्॥अधानेतावहनीयादीनांदृष्टेज्वलनाकारेनानिष्पादके॥किंतु॥
तान्निष्टापूर्वसंस्कारमात्रइतियुक्तं॥नहिधेःप्राप्तणादिविधेरिवअपूर्वेविधितत्तस्मात्प्राकृतवदिरादिनियमवि
धतिव्याप्तिरनिवार्यैव॥एवमुद्देश्यगतविवक्षितरूपभेदाश्रयणनाप्राप्तिसमर्थनस्यातिव्याप्तिदृष्टत्वात्तत्परि
हारायययथावार्त्तिकंतत्तद्विध्यभावेविधेयत्वाप्राप्तमतस्यप्राप्तिअप्राप्तिविवेचनेनैवनियमापूर्वविधिव्यवस्था
पपादनीय॥तथासतिहादर्शेज्यनीकाविध्यभावेप्याघ्यारनेाश्रोदकादेर्द्रवायवद्गृह्यतेप्रामुतःगवामय
नेचाथयोरनेाःप्राप्तिस्विकविध्यभावेपिस्वस्थानवस्थितज्यनीकाविधिबलादेर्द्रवायवाग्रतेप्रामुतइत्यदाह्
तागृहीताचतुष्टयाव्याप्तासतिसप्तमीपक्षेप्रथमविकल्पेाउष्टएवेत्यर्थः॥अस्मिन्नेवविकल्पेस्थलांतरेध्व्या
प्तिरूपभेदविवक्षयानिरासंतुमत्राक्यदाहरतिअव्याप्तिःपौर्णमास्यामपियजनविधावत्रकल्पेग्रसर्पत्प्रा
प्तेर्द्रव्यस्यतेत्यधिगतफलतोपांशुयाजस्यलक्ष्यत्वास्यात्किंचोषापरिफलसमायोजनार्थेप्रवृत्तेर्निष्प्रयोज
नहेात्वाकृतियुगलमिताधानसंकीर्तनेनदर्शपूर्णमासप्रकरणेश्रूयतेतवक्रतामग्नीषेामावाज्यस्यैवनाउ
पांशुपौर्णमास्यायजन्निवत्रवाकल्पेकीर्तितानांयागतदपेक्षितानांग्नीषेामदेवताद्रव्यापांशुत्वगुणपौर्ण
मासिकालानांमध्येकालव्यतिक्रांतंतत्तद्विध्यनुगुणशक्त्याभावादन्यतःसंभवत्प्राप्तिकानांतेषांपुनःप्रापण

स्यनिष्फलत्वाच्चकालस्यैवविधिः॥नत्वग्नीषेामवत्कृकवाक्यगतस्ययजन्निवत्यस्ययागविधेषष्ठीचतुर्थीसारेधेाणस्य
नाविसस्यदेवताविधावाज्यस्येतिषष्ठ्यंतस्यद्रव्यविधेावाद्गेवानुगण्यमवगम्यतेसंभवतिचेापांशुयाजमंतरा
यजतीतिस्यष्टविधिनायागस्ययष्टव्यदेवताप्रकाशनेकप्रयेाजनकेनाग्नीषेामीययाज्यानवाक्यायुगलेनदेवता
यांसर्वस्मैवाएतस्यसायंगृहपतइत्यादिनद्रव्यापेक्षसर्वयागार्थेताविधायकतयाकृप्तेनप्रेावाज्यविनियेागवचने
नद्रव्यस्यचप्राप्तिःउपांशुत्वस्यापियेागेसतिवाक्यतएवप्राप्तिःसंभवतिअतेात्रपुराकल्पसरूपार्थवादेनकल्प्यः
कालस्यैवविधिस्तदनुगणसप्तमीविभक्तिश्रवणात्तद्धानस्यफलवत्त्वाच्चतथाहियद्यपिनतेद्धानमुपांशुया
जस्यपौर्णमासीकालसिध्यर्थंसंभवतितस्मेापांशुयाजमंतरायजतीत्यस्यसतिवाक्येनैवपौर्णमासिकर्त्तव्याग्रया
ग्नीषेामीययागद्वयांतरालेउपांशुयाजविद्धानेनार्थतःसिध्यत्यतथाप्युपांशुयाजस्यदर्शपूर्णमासाभ्यांस्व
र्गकामेायजेतेत्यधिकारवाक्येद्दृष्टफलसंबंधासिध्यर्थंभवेदेवएतद्भावेविद्धाक्यस्येनाधिकारवाक्यस्ये
नचपौर्णमासीपदेनयदाग्नेयेाष्टकपालेमावास्यायांचपौर्णमास्यांचाच्युतेाभवतिताभ्यामेतमग्नीषेामीयमेका
दशकपालंपूर्णमासेप्रयछतइत्यस्यसतिनिवाक्यावगतपौर्णमासिकालेयेाग्नेयाग्नीषेामीययागयेारेवषउति
प्रवृत्तिनिमित्तावगत्याप्रथमगृहीतयेाःफलेसंबंधकरणार्थावगतस्यपौर्णमासिसंबंधस्यापांशुयाजस्य

विलंबितप्रवृत्तिनिमित्तप्रतीतिकृतयाविहद्वाक्याधिकारवाक्यगतपौर्णमासीपदगृहीतस्यफलसंबोधनसिध्येदिति
यतुभवदेवेनास्यविधेःप्रयोजनमुक्तंयत्तुरालविधिलभ्यएवोपांशुयाजेपौर्णमासीकालस्यात्तदानीमातेयो
वैब्राह्मणोदेवतयासस्तोमेनेष्ट्वाग्नीषोमीयोभवतीतिश्रुतेरसोमयोजिनोऽग्नीषोमीयपुरोडाशेभविनतदी
यामेकपुरोडाशायांपौर्णमास्यांपुरोडाशद्वयांतरालाभावात्उपांशुयाजोनप्राप्नुयात्प्राप्तिस्त्विककालविधि
सद्भावेत्वंतरालकालमनपेक्ष्यैवपौर्णमास्युपांशुयाजंगमितिसिध्येत्तदनुसारेणांतरालश्रवणमात्रेयो
रकालमात्रेापलक्षणंभवेदितिसेकपुरोडाशायांमप्युपांशुयाजःप्राप्नोतिअतस्तस्यामुपांशुयाजप्राप्त्यर्थंपौ
र्णमासिविधिरितितदनुसारंउपलक्षणापापेप्युपलक्ष्यानपायन्यायादेवएकपुरोडाशायामपित्तत्प्राप्ति
संभवेनतदर्थंविध्यंतरानपेक्षणात्उपलक्षणंहिपुरोडाशेद्वयमुपांशुयाजांगस्यकालस्यनतुस्वयमुपांशु
याजांगंयेनतदभावेतेद्गुण्यंस्यात्नचतदभावेऽंतरालकालस्याभावातेवगुण्यंउपलक्षणापायेप्युपल
क्ष्यानपायस्यप्रतिदिनंश्रवस्यनवेलायामागंतव्यमित्यादौप्रसिद्धत्वात्नहिकालविशेषोपलक्षणतया
पातेश्रवध्वंनोकञ्चिद्दिवसेवैवाहतेसतितदुपालक्षितेःकालोनास्तीगम्यतेननुहिपुरोडाशायांस्यादंतरा
लार्थेत्वादितिदर्शमास्याधिकारेऽंतरालश्रुतिबलात्द्विपुरोडाशायामेवोपांशुयाजइतिपूर्वपक्षेप्राप्तेउ

MEMORIAL

भयोस्तुविधानादितिसिध्यंतसूत्रेणउपांशुपौर्णमास्यांयाजइतिपौर्णमासिविधानमेवहेतुकृत्याद्विपुरोडाशायामे
कपुरोडाशायांचोपांशुयाजःसमर्थितःसन्॥उक्तनिश्चितंतरालकालवैगुण्येसतिसहेतुरसाधकइत्यस्यारस्यादे
वतदनंतरमनपायोहिकालस्यलक्षणंहिपुरोडाशेतिसूत्रांतरेणतथैवपूर्वास्वारस्येवर्णयतातद्भाष्येणचउ
पलक्ष्यानपायन्यायमेवहेतुकृत्यकालवैगुण्याभावःसमर्थितः।तन्न्यायापेक्षणेचततएवैकपुरोडाशायाम
प्युपांशुयाजप्राप्तिर्भवतीतिनसापौर्णमासीकालविधानमपेक्षते॥अवश्यंचोपलक्षणनपायन्यायमात्रादि
ध्यंतरमनपेक्ष्यैवोपलक्षणराहित्येपिप्राप्तिर्भवतीतित्वयापिस्वीकरणीयंअन्यथापौर्णमासिविधिबलादेक
पुरोडाशायामप्युपांशुवन्नप्युपांशुयाजोग्नीषोमीयएवप्राप्नुयाद्विष्णुदेवसःप्राजापतिदेवत्यश्चनप्राप्नुयात्पौ
र्णमासीविधीतावाक्यावग्नीषोमावितिश्रवणात्एकपुरोडाशायामुपांशुयाजसामान्यप्रापकविध्यंत
राभावाच्चतस्मात्तत्राग्नीषोमीयारुपलक्षणत्वादैंद्राग्नेतरदेवताप्युपांशुयाजस्याग्नीषोमोपलक्षितयागस्यान
पायादेकपुरोडाशायांप्राप्तिः॥समर्थनीयेतिततएवोपलक्ष्यानपाइन्यायाद्उपांशुयाजमंतरायजतीतिवि
धिमारोपितादेकपुरोडाशामपितत्प्राप्तिःसिध्यतीतिनसापौर्णमासीविधेः।प्रयोजनमितिप्रागुक्तोपांशुया
जस्यफलसंबंधसिध्यैवप्रयोजनंतदेवप्रयोजनमुपांशुयाजाधिकरणेप्रायोवचनाच्चेतिसूत्रेणतद्वृत्तिकेन

चस्यष्टीहते॥तत्रह्यधिकरणेविष्णुरुपांशुयष्ट्योजामित्वायप्रजापतिरुपांशुयष्ट्योजामित्वायाग्नीषोमावुपांशुय
ष्ट्यावजामित्वायेतित्रयाणांयागानांविधयः।अंतराक्यंवीतुतत्समुदायानुवादोविद्वाक्यादितिपूर्वपक्षंनिराकर
णार्थंसूत्रंप्रायोवाचनादितिशिरोवाएतद्यज्ञस्ययदाग्नेयोहृदयमुपांशुमाजस्यादावग्नीषोमीयउपांशुयाजस्य
प्रधानप्रायपाठात्॥प्राधान्यावगतेःविष्ण्वादिवाक्यैस्त्रयाणांयानामुपांशुयाजशब्दपराष्टानांविधावपांशुया
जमात्रप्राधान्यवगतिमात्रबाधप्रसंगदराक्यविधेयएकएवोपांशुयाजःतदर्थवादाविष्ण्वादिवाक्यनीति
सूत्रस्यास्यभाष्येतासर्वमुक्तंकथयागत्रयविधिपक्षेतत्प्राधान्यावगतिवाघस्यादिसाशंक्यापवादेतेवार्त्ति
विष्णुप्रजापत्यग्नीषोमदेवत्ययागत्रयविधिपक्षेतावच्छ्रुतावग्नीषोमावित्यादिनाऽग्नीषोमदेवत्यस्यैवयागस्य
पौर्णमासीविधिरितिस्यात्॥तथाचतस्यैवावद्यद्वाक्यफलवाक्यस्थपौर्णमासीपदगृहीतस्यफलसंबंधेनप्रा
प्तान्यंसिध्येत्।नतुतदगृहीतयोर्विष्णुप्रजापतिदेवत्ययागयोरंतरवाक्येनैकस्यैवयागस्यविधिस्तत्रैवस्था
खाभेदेनाम्नातेयाज्यानुवाक्यायुगलेःप्राप्तिताविष्ण्वादिदेवताविकल्प्यंतइतिसिद्धांतपक्षेतु॥विष्णुप्र
जापतिदेवत्यस्यस्याप्येकलेनाग्नीषोमीयपलक्षितस्यानपायादुपांशुयाजसामान्यस्यपौर्णमासीकालसंबंध
लाभेनसिध्यतिप्राधान्यमितिअनेननपौर्णमासीविधिनैवलभ्यःफलसंबंधोनांतरालविधिरभ्युपेयःइत्याश

यस्यष्टएवंअन्यथाविष्णुप्रजापतिदेवत्ययेराहुपौर्णमासीविध्यभावेप्यंतरालकालतमार्धप्राप्तपौर्णमासी
संबंधेनैवफलविधिगृहीतयोःप्राधान्यंसिध्येदितितत्प्राधान्यावगतिबाधप्रसंगदूषणमसमंजस्यंसेत
न्वंतराक्यंयागत्रयसमुदायानुवादकमितिपूर्वपक्षेंतरालेयागविधायतंकिंचिद्वाक्येनास्तीतिविष्णुप्रजा
पतिदेवत्ययोःफलसंबंधार्थंपौर्णमासीविधिरेवशरणीकरणीयःअतोयागभेदेतस्याग्नीषोमीयमात्रविष
यत्वेनतयोःफलसंबंधोनसिध्येदितिदूषणमसंजस्यमितिचेतन्नअंतराक्यमनुवादइतिपक्षेपिजामि
तादोषनिर्हरणार्थंमंतराश्रुतेरनालंबनत्वपरिहारार्थंचत्रिष्वपियागेषुअंतरालप्राप्तेरवश्यवक्तव्यत्वात्॥
भवेदेवंनैवउपांशुयाजाधिकरणपूर्वपक्षेकथमंतरालवाक्यस्यसंबंधानुवादत्वंअंतरालस्यैवाप्राप्तस्य
विधेयत्वादितिसाशंक्यजामितादोषोपक्रमेणविष्ण्वादिवाक्येषुप्रत्येकमजामितानुवादेनचतेषंतरालप्रा
प्तिमुल्लंघ्यभवतिचानुवादतोपिस्थाननियमः॥यथानगिरागिरेतिक्रियादितिगिरापदनिषेधानुवादबलादि
त्यस्यगिरापदस्थाननिवेशेनतत्प्रतिसदृष्टांतमुपपादितत्वात्केचित्॥विष्ण्वादिवाक्यानियागविधयइ
तिपक्षेतत्प्राधान्यबाधमन्यथासमर्थयंते॥विष्ण्वादिवाक्येषुतत्यत्ययात्प्रथमंगुणकर्मत्वप्रतिर्भवति
कर्मांतरानुपयोगात्॥अनुसंधानेननुप्रधकर्मतावगंतव्या॥अतःशीघ्रावगतप्रधानकर्मणामेवाधिकारा

नुप्रवेशात्उपांशुयाजस्यतदननुप्रवेशेनप्राधान्यवगतिर्विहन्येतअंतरवाक्ययागविधिरितिपक्षेतुतद्धतथाप्रत्यया
भावेनगुणकर्मत्वेधीताविलंबाप्रसक्तेराग्नेयादिवदेवाधिकारानुप्रवेशात्प्राधान्यावगतिर्नविहन्येतेति॥तेषाम
प्यधिकारानुप्रवेशोपयोग्यर्थेप्रतीतिरौपयमांधकृततदनुप्रवेशाननुप्रवेशान्यायस्यसंमतत्वादुपांशुयाजस्या
ह्यपौर्णमासीविध्यभावेश्रुतपौर्णमासीकालयोराग्नेयाग्नीषोमीययोरेवाधिकारानुप्रवेशास्यादिस्फुपांशु
याजस्यतदनुप्रवेशलाभफलकएवपौर्णमासीविधिःसिध्यतिस्यादेतत्॥यदिपौर्णमासीसंबंधप्रतीतिरौप्य
मांधाभ्यांमधिकारानुप्रवेशाननुप्रवेशौस्यातांततोपांशुयाजस्योसन्निवाक्यप्रत्तिसापेक्षेणवाक्यांतरेण
पौर्णमासीसंबंधलाभेपिउसन्निवाक्यगतपौर्णमासीसंबंधयोराग्नेयाग्नीषोमीययोरेवाधिकारानुप्रवेशास्या
दितिसरोषःस्तदवस्थः॥नचवाच्यमनन्यप्रयोजनःपौर्णमासीविधिर्विलंबितोपितस्याधिकारसंबंधमा
पादयिष्यतिअन्यथतेहैप्यर्थ्यप्रसंगात्॥एकपुरोडाशंयमुपांशुयाजमाप्नोतीत्यनपायन्यायलभ्यतयाए
तावधिप्रयोजनलाभावादितिअमावास्यायामुपांशुयाजव्यावर्त्तनेनापिपौर्णमासीविधेश्चरितार्थ्यादुपां
शुयाजोसन्निवाक्यपर्यालोचनयैहिअमावास्यामपिसमाप्नोतियथापौर्णमास्यांआग्नेयाग्नीषोमीयेपुराडा
शेतथाआमावास्यायामाग्नेयेंद्राग्नेस्तइतिपुरोडाशद्वयांतरालस्यद्वयोरपिसत्वात्आमावास्यायांसोम

याजिनःऐंद्राग्नाभावेनेवपौर्णमास्यामसोमयाजिनोग्नीषोमीयाभावेनपुरोडाशद्वयासार्वत्रिकत्वस्यापितयो
राविशिष्टत्वात्तस्मात्पौर्णमासीविधिरमावास्याव्यावर्त्तनेनचरितार्थःस्यादेवंसतएवदर्शेपिवापौर्णमास्यां
स्यात्यथानशब्दसंयोगान्नित्यायथाप्रधानंस्यादितिसूत्रेणप्रधानस्योपांशुयाजस्यउपांशुपौर्णमास्यांयज
तितिशब्देनपौर्णमासीकालसंयोजनात्पौर्णमास्यामेवोपांशुयाजःकर्त्तव्यइतिपौर्णमासीविधिचलादेवा
मावास्याव्यावर्त्तनंलभतमितिचेदुच्यतेउपांशुयाजमंतरायजतीतिवाक्यपौर्णमासीरूपएवांतरालकाले
उपांशुयाजंविदधातिउपांशुपौर्णमास्यांयजंतिति प्रकृत्यजामिवाएतदितिसामान्यादितिदर्शसाधि
करभाष्यवार्त्तिकयोरुक्तंअतउपांशुयाजस्याप्युसन्निवाक्यावगतकालत्वाविशेषात्नक्रियाधिकार
प्रवेशांतरायःएवंचयद्यप्यत्रपौर्णमासविधिरमावास्याव्यावर्त्तनेनपरिसंख्यारूपस्तथापितदनंतरा
म्नातोसन्निवाक्यश्रुतमंतरालकालंपौर्णमासीरूपतांनयत्युपांशुयाजस्यफलसंबंधार्थीभवतीत्यपूर्वंवि
धिरूपताप्यस्यअवरुद्धभाविनीततश्चात्रानुपादेयत्वेनउद्देश्यपौर्णमासीकालविधेयस्ययागस्यप्रोप्ति
तद्भावेप्युसन्निवाक्यपर्यालोचनयाअर्थोलभ्यतइतितस्याःफललाभावात्तांविहायविधेयस्यानुद्दे
श्यधिकारवाक्योपात्तस्वर्गप्राप्तिफलत्वेनोपादानेअस्मिन्विधौरूपभेदविवक्षायामव्याप्तिरनिवार्या

हि अत्र पौर्णमासी लोपहिते काले उपांशुयाजस्याप्राप्तिरस्ति अन्तराल विधिसामर्थ्यात् न तत्प्राप्तिसंभवात्॥ नवादते
न्येन रूपेण केनचिदुपहितेतत्रतस्याप्राप्तिमुपपाद्य तत्प्रापणार्थमिदं वचनमिति कल्पनेतत्किंचित्प्रयोजनमस्ति
पौर्णमासीलोपहित एवतद्विधानस्यफलसंबंधसिध्यप्रयोजनतत्वात्तस्माद्रूपभेदविवक्षायामप्युक्तविधा
वव्याप्तिस्यादेव अपिचेदं आहवनीये जुहोतिचतस्त्रोगार्हपत्ये चतस्रोन्वाहार्यपचने दशसंपद्यंतेदशाक्षराऽ
यएवंविद्वान्विराट्संपन्नमग्निहोत्रं चजुहोतीतिसत्रेदं आहवनीये इत्यस्मिन्हयोरग्निहोत्रा कुत्योर्यदा आ
हवनीयेजुहोतीतिसामान्यशास्त्रप्रमिताहवनीयरूपाधारसंकीर्तनव्याप्तिः। इदंहिनाहवनीयस्याकृति
हयसंबंधप्राप्त्यर्थंसामान्यशास्त्रेणप्राप्तादेवनापिविराट्संपत्तिवाक्यानुसारेणदशसंख्यानामग्निहो
त्राहुतीनांहीएवाहवनीयेनतुष्टावितराइतिपरिसंख्यार्थंअष्टानांगार्हपत्यान्वाहार्यपंचनरूपाधिकरणां
तरविधानादेवआहवनीयव्यावृत्तिसिद्धेकिंतुतासामष्टानामाहुतीनांआकृतिहयवत्अग्निहोत्रंजुहुया
तस्वर्गकामइत्यधिकारवाक्यचोद्यफलसंबंधप्राप्त्यर्थंतथाहिदं आहवनीयइत्येतदभावेचतस्रोगार्हपत्ये
चतस्रोन्वाहार्यपचनइतिवाक्येसंख्याधिकरणविशिष्टकर्मविधायकेस्यातांनत्वग्निहोत्रंजुहोतीत्कृतिवा
क्यविहितकर्मानुवादेनगुणमात्रविधायकेप्राप्तकर्मणिसंख्याधिकरणरूपानेकगुणविधानेवाक्यभेदाप १२

तेः नचयथायदग्नयेचप्रजापतयेचसायंजुहोतियत्सूर्यायप्रजापतयेचप्रातरितिवाक्ययोः कालदेवतारूपाने
कगुणश्रवणेप्यग्निहोत्रवाक्यासन्नहोमानुवादेनगुणमात्रविधानमितितस्यैकस्यैवहोमस्यसायंप्रातःकाल
योरग्निप्रजापतिसूर्यप्रजापतिदेवताभेदेनाहुतिद्वयाभ्यासइत्यभ्युपगम्यतेएवमिहाप्यनेकगुणश्रवणेपित
स्मिन्होमेगुणमात्रविधानमितितस्यैवाधिकरणभेदेनचतुरश्चतुरभ्यासोप्यभ्युपगम्यतामितिवाच्यं॥सायंजु
होतीतिविधिभ्यांसायंप्रातःकालयोरग्निर्ज्योतिर्ज्योतिरग्निस्वाहासूर्योज्योतिर्ज्योतिसूर्यस्वाहेतिकालाग्नि
होत्रमंत्राभ्यांअग्निसूर्ययोश्चप्राप्तेनयदग्नयेयत्सूर्यायेतिवाक्ययोः कालहयेपिप्रजापतिसमुच्चयमात्रवि
धिसंक्रांतयोर्गुणमात्रविधानेपिवाक्यभेदाप्रसंगात्इहसंख्याधिकरणयोर्हयोरप्यनन्यलभ्यत्वेनगुणमा
त्रविधानेवाक्यभेदानिवारणात्॥एवंचगार्हपत्यान्वाहार्यवाक्ययोः संख्याधिकरणविशिष्टहोमविध्यवश्यं
भावेनतेष्टावपिहोमाअग्निहोत्रवाक्यविधेयात्सायंप्रातःकालयोर्देवताभेदेनाहुतिद्वयसनीयाधोमाद्न्येए
वस्युःविहितस्यविथानायोगादितिनतेषांअग्निहोत्राभिधानामसिध्यतिकिंत्वग्निहोत्रवाक्यविहितस्यैकस्यैवे
तन्नामेतिप्राप्तेतिनुप्तिवाक्यगतत्वात्अग्निहोत्रवाक्यविहितस्यसाभासस्यहोमस्यगार्हपत्यान्वाहार्यप
चनेवाक्यहितहोमानांचानुवादकेविराट्संपत्तिवाक्येतावत्साधारण्येनअग्निहोत्रशब्दप्रयोगसहेपित

स्यछत्रिन्यायेनलक्षणोपपत्तेः।अग्निहोत्रंवाक्यविहितेकर्मणिप्रथमावगतेशाक्यवरयंभावेतत्संबंधादितरेषु
लक्षणोपपतावनेकशक्तिकल्पनस्यान्यायत्वात्अतएवरथंतरंपृष्टंभवतिबृहत्पृष्टंभवतीत्यादिवाक्यानां
हेदस्तोत्रनामत्वेनप्रथमावगतस्यपृष्टशब्दस्यसामदृशानिपृष्टानीत्यनुवादवाक्येमाहेंद्रादिषुचतसृषुस्तोत्रेषु
प्रयोगोलाक्षिणिकरतिप्रकृतौपृष्टवदुहवैनास्तीतिप्रपंचितेसप्तमेविश्वजितिसर्वपृष्टस्तुतौकालज्योतिष्टो
मिकानिपृष्टान्यस्तिचपृष्टशब्दइत्यधिकरणेएवंचाधिकारवाक्येस्तेनाग्निहोत्रंनास्ताअग्निहोत्रवाक्यवि
हितस्यैवहोमस्यसमर्पणात्तस्यैवफलसंबंधःसिध्येत्॥ननुगार्हपत्यान्वाहार्यपचवाक्यविहितानांहोमा
नांहेआहवनीयइतिवाक्यसद्भावेतुविराट्संपत्तिवाक्यानुसारेणदर्शधभ्यसनीयस्याग्निहोत्रहोमस्यद
र्शानामभ्यासानांमध्येष्टानामभ्यासानांहेआहवनीयइत्यनेनआहवनीयपरिसंख्यायांतेषामपेक्षितम
धिकरणमेवगार्हपत्यान्वाहार्यपचनवाक्याभ्यांविधीयेतेतयोश्चतुःसंख्याश्रवणंतुसमेस्यादश्रुतत्वादि
त्यन्यायप्राप्तानुवादकमितिलभ्यतेएवमग्निहोत्रवाक्यविहितस्यैवहोमस्यदेवताभेदेनाधिकरणभेदे
नचसायंप्रातर्दर्शदर्शाभ्यासःनतुतद्व्यतिरेकेणहोमांतराणिसंतीतिपर्यवसानेअधिकारवाक्यगतम
ग्निहोत्रनामसर्वविधाभ्यासस्हितस्याग्निहोत्रस्यसमर्पकमितिसर्वसाधारण्येनफलसंबंधःप्राप्नोतिय १५

थासोमेनयजतेतिवाक्येसन्नेंद्रवायव्यादिदेवताभेदेनाभ्यसनीयस्यसोमयागस्यज्योतिष्टोमपदंनामेति
सर्वाभ्यासस्हितस्यसोमयागस्यअधिकारवाक्येनफलसंबंधःनचेहआहवनीयइतिवाक्याभावेपिविराट्संपत्तिवाक्य
मग्निहोत्रहोमस्यदर्शाभ्यासविधायकमंगीक्रियतांतथासतितत्रतदुक्तरीत्यादृष्टानामभ्यासानामधिकरणमात्र
विधायकयोगीहेपत्नीसंयाजान्वाहार्यपचनवाक्ययोसंख्याश्रवणंन्यायप्राप्तानुवादकंभविष्यतीतिपराग्निहोत्रहोमानाम
ग्निहोमाभ्यासरूपेणफलसंबंधःसिध्यतीतिवाच्यंयदिहिआहवनीयवाक्येनस्यान्नदार्गार्हपत्यान्वाहार्यपच
नवाक्ययोस्तदधिकरणविधायकत्वेतदर्शानामभ्यासानांअधिकरणविधानायपत्नीसंयाजानुवादासंभवेन
तयोःसंख्याधिकरणविशिष्टकर्मांतरविधायकत्वस्यावश्यंभावितयाविराट्संपत्तिवाक्यमाग्निहोत्रहोमानांप्रच
यशिष्टसंख्यानुवादकमितिसकामेनाप्यंगीकरणीयतस्मादाहवनीयवाक्यप्रदर्शितेअधीनेएवापराग्निहोमानांफ
लसंबंधःएवंचास्मिन्हेआहवनीयइतिविधौअविधेयानामापराग्निहोमाभ्यासानांनदेश्यस्वर्गसंबंधप्राप
णमेवफलमितियंविधिरहेश्येविधेयस्यनित्यप्राप्तत्वात्तस्यान्यत्रान्यस्यवाप्राप्तस्यनियम्यस्यनिवर्त्यसवा
भावाच्यकेवलंपरफलसंबंधबोधनार्थःतत्रायंसंग्रहःहेआहवनीयइतिश्रुतविधेहिअग्निहोत्रमधिकृत्यप
रफलसंबंधंविधानेनान्यत्फलंकिंचित्प्राप्तनप्रापयतीयंकिलयदिहकियान्पूरणीयास्तिनांहोमानिहवानिव

र्यं निजविषयतयादृश्यतेकिंचिदस्यकिंतुव्यापारमेषा प्रथयतिफलसंयोजनार्थंपरेषांप्रायः पुण्येरगण्येरिव वि
बुधकरगणैरेकदेशोपपालं॥तस्मादस्मिन्नपिविधौतद्व्याप्तिरनिवार्येइतिभावः॥अथान्यत्राप्यव्याप्तिमुद्रा
हरति॥आकांक्षादर्थवादादुपनमतिफलेकर्मणोयद्विधानंतत्राप्येषातदंगीभवनरूपतिभवेत्सन्निधानश्रुता
नांयद्किंचिच्चत्रकुत्रव्यनधिगतवतीस्वेलक्ष्मस्थितिंश्येनाद्येप्रसिद्धोनियमविधिरपिस्यादपूर्वविधानं॥
वैश्वदेवीऽसाग्रहणीनिर्वपेद्ग्रामकामोवैश्वदेवावैसजातान्विश्वानेवदेवांस्तेनभागधेयेनोपधावतितएवा
स्मैसजातान्प्रयच्छतिग्राम्येवभवतीतिश्रूयतेऽत्रसाग्रहणीष्टेग्रामफलेयद्विधानंन्नतस्यास्तत्प्रयुक्तार्थरात्रि
सत्रन्यायेनस्मनंतरार्थवादादेवतत्प्राप्तिसंभवात्आकांक्षितोह्यत्रविधिनार्थवादःस्तुतिलाभायविशिष्य
चात्रग्रामशब्दोयंबहूक्तेइतिमहाभाष्यालकरेनकार्थस्यफलसमर्पकस्यग्रामशब्दस्यविवक्षितार्थनिर्णयलाभा
यकिंतुसाग्रहण्यास्तदर्थवादफलकल्पनायामाममनस्यमनस्यदेवाइतितिस्रआहुतीर्जुहोति॥एतावंतोवै
सजाताये महांतोयेक्षुल्लकायास्त्रियस्तानेवावरुंधेतएनमवरुद्धाउपतिष्ठंतइतितत्सन्निधिपठितानामामनहो
मानामपितदर्थवादसलार्थंतत्कल्पनाप्रसक्त्यातेषांसाग्रहण्यंगत्वेनप्रापयादितिसाप्यर्थमेतत्सहेहिप्रत्यक्षे
णविधिनासाग्रहण्याःशीघ्रंफलसंबंधेवगतेफलवदफलन्यायादामनहोमानांतदंगत्वंप्राप्तोतिएवचात्रविधे

यायाःसाग्रहण्याःकेनापिरूपेणोद्दश्यग्रामसंबंधाप्राप्तिर्नास्तीतित्राव्याप्तिरनिवार्या॥ननुलक्षणेप्रकृतविधुद्दृ
श्यमप्राप्तेसतीतितथाचनेतासामव्याप्तीनामवकाशइतिचेन्न॥एवंहिह्रीहीनवहंतीत्यादिषुप्रसिद्धोनियम
विधिरपिमपूर्वविधिस्यात्।दर्शपौर्णमासिकप्रयाजादिविधौसोयंदिविहृतिमप्राप्तेसतितद्विधिप्रवृत्तेस्तत्स
थाविवक्षानोचेद्व्याप्तिःस्यादेवेतिभावःस्यादेतत्रविधिरसंतमप्राप्तंद्दश्यंतद्विध्यप्रवृत्तावसंतंप्राप्तिमस
क्तिमतीतिपर्यवसितोर्थः॥तस्यश्लोकस्यव्याख्यानसमयेसचिंतनेनतस्यविधेस्तत्प्राप्तिफलकत्वमर्थोलभ्यते
अतोयस्मिन्कस्मिंश्चियद्किंचिदप्राप्तेसतीतिविवक्षायामपितस्यतत्प्राप्तिफलकत्वमेवाधिकांशस्यलक्षणेनिवे
शात्तनावहननविधावतिव्याप्तिप्रसंगः॥तस्यसौर्यादिषुप्रयाजादिप्राप्तिफलकत्वाभावात्एवंचवैहृताप्रतिग्रा
ह्यविधिषुअविधेयानामपिगुणकामानांतत्तद्विध्युद्दश्यासुपिहृतिषुप्राप्तेःदर्शाहिकगावामयनिकक्रयनीकांत
गेतोतदनंतर्गताग्नेयादिविधिषुविधेयानामेवाग्नेयानांतत्तद्विध्यनुद्दश्यासुदर्शाहविहृतिषुप्राप्तेरपांशुपौर्ण
मास्यांयजतीतिविधौविधेयस्यापांशुयाजस्यतत्तद्विध्यनुद्देश्येस्वर्गप्राप्तिः।दर्शआहवनीयइतिविधावविधे
यानामाग्नेयाग्निकहोमानामनुद्देश्येस्वर्गप्राप्तेःसाग्रहणीफलविधावविधेयानांतत्सन्निधिपठितानामनुद्देश्यांत
र्विध्येकर्मणिप्राप्तेश्चफलस्यसङ्गात्तत्रकाप्यव्याप्तिशंकावकाशोपीसाशंक्याहउद्देश्यन्यत्रवायद्विधिपदमि

तरहापिनप्राप्तिमत्स्यातत्प्राप्तिंतत्रतत्वनविधिरितिकरणेव्येवमव्याप्तिरेव॥ज्योतिष्टोमादिकानांत्रिदिवगतिं
फलेसर्वकामोक्तिसिध्येकिंप्राप्यंधर्मजातेप्रकरणगमितेस्वर्गकामश्रुतिभ्यां॥ज्योतिष्टोमेनस्वर्गकामोयजेतद
र्शपूर्णमासाभ्यांस्वर्गकामोयजेतेतिरश्रूयतेइदंवाक्यद्वयंज्योतिष्टोमशब्दगृहीतस्यसोमयागस्यदर्शपूर्णमासश
ब्दगृहीतानामाग्नेयादियागानांनरूपप्राप्त्यर्थंसोमेनयजतेतिविधिवाक्येनाग्नेयादिवाक्यैश्चतेषांप्राप्तावादिति
तावत्स्यष्टमेवनापितेषांस्वर्गसंबंधप्राप्त्यर्थंएकस्मेवान्ययत्नकृतवः कामायाहीयंतेसर्वेभ्यः कामेभ्योज्योतिष्टो
मःएकस्मेवान्ययत्नकृतवः कामायाहीयंतेसर्वेभ्यः कामेभ्योदर्शपूर्णमासाविति वचनाभ्यांतेषांपश्वादिफलक
त्ववत्स्वर्गफलकत्वस्यापिप्राप्तिसंभवात्नाप्यंगसंबंधबोधनार्थंप्रकरणकल्पितेनवाक्येनतत्प्राप्तिसंभवात्तन
हिस्वर्गकामकामवाक्ययोरंगसंबंधबोधकत्वमपितदुचितंशब्दकल्पनंविनासंभवतितयोरंगसमर्पकंश
ब्दाभावात्॥नचदीक्षणीयासमिदादिवाक्यविशेषितयोस्तयोःसंबंधबोधकत्वंसंभवतीतिवाच्यंदीक्षणीया
दिवाक्येऽपियष्ठ्योपबंधरहितस्वर्गेत्यारभ्यातसत्वेनस्वतस्तेषामन्यविशेषणत्वालाभात्तस्मात्स्वर्गकामे
वाक्ययोरंगसंबंधबोधकत्वांगीकारेपितयोर्दीक्षणीयसमिदादिवाक्यानांचप्रत्यक्षमपिएकवाक्यत्वंप्रक
रणबलेनैकवाक्यतापादकशब्दकल्पनयोपपादनीयंतथाहिज्योतिष्टोमेनदर्शपूर्णमासाभ्यांवास्वर्गोपूर्वं

DR BHAU DAJI

१६

भावयेदित्यत्रेभवतिप्रकाराकांक्षाकथंतेनताभ्यांद्भावनीयमिसविस्तरप्रकारत्वात्नहिगोधूमेर्मउकान्कुर्वी
त्यत्रेतत्प्रकारनभितस्यनियोज्यस्याकांक्षानभवतिकथंगोधूमैर्मउकान्कुर्व्यादितिकुतोरणवंसंबंधीत्यत्रेतत्प्रका
रानभिज्ञस्यभवतिप्रकारकांक्षातेप्रतिहस्ताभ्यांकुतरंगृह्णीयादितिनियोक्तव्यमेवतत्प्र
कारस्यलोकेप्रसिध्यत्वात्प्रायेणवभवतितत्राकांक्षाइत्यत्रज्योतिष्टोमादिभिःस्वर्गोपूर्वंसंपादनस्यायंतालोकिकहोम
कारांकांक्षावश्यंभाविनीतथादीक्षणीयादीनामप्यस्तिप्रयोजनाकांक्षातादृक्परस्यराकांक्षालक्षणेप्रकरणेसति
रेवतीषुवारवंतीयमग्निष्टोमसामकृतापशुकामोयेतेनयजेतेतिवदीक्षणीयादिवाक्यानांप्रत्यक्षेणज्योतिष्टोमवा
क्यैकवाक्यत्वेचास्तियेनशब्दिनदीक्षणीयादिव्यापाराणांविशेषणमनुल्काइहदेवदत्तगृहेवर्त्ततेज्योतिष्टोमादि
विशेषणतालभ्यतेनादृक्शब्दकल्पनेनाप्रत्यक्षमेकवाक्यत्वंप्रकरणबलेनकल्प्यतीयंयथाकीदृशोदेवदत्त
गृहमितिप्रकरणंकांक्षायांहारोपांतलिखितोरंगवपद्यनिधीत्यनिछुटेबहवश्चपकाःसतीत्येतावत्युक्तेपिगृ
हस्यप्रकारंकांक्षायांप्रकारोपदेशस्यप्रयोजनाकांक्षायांतदुचितशब्दकल्पनयैकवाक्यत्वंकल्पतइत्येवमेवोपपा
दितंतत्रतथास्वर्गकामवाक्ययोरंगसंबंधबोधकत्वानंगीकारेपिप्रकरणबलात्तद्बोधकंवाक्यंकल्पयितुंशक्यं
तथाहियद्यपिसर्वेसमवाक्ययोरारभ्यातरहितयोर्योगभावनानश्रूयतेतथापिचतुर्थ्योज्योतिष्टोमस्यदर्शपूर्णमास

योऽश्यसर्वकामार्थत्वप्रतिपादनात्ज्योतिष्टोमेनदर्शपूर्णमासाभ्यांचस्वर्गेपशुपुत्रहिरण्याद्यपूर्वभावयेदित्यर्थतो
त्स्यादेवतत्सकाराकांक्षादीक्षणीयादीनांसमिदादीनांचपूर्ववत्प्रयोजनाकांक्षास्तितेवएवमुभयाकांक्षालक्षणेन
प्रकरणेनदीक्षणीयादिभिःसमिदादिभिश्चोपकृत्यज्योतिष्टोमेनदर्शपूर्णमासाभ्यांचस्वर्गपशुपुत्राद्यपूर्वंभावये
दितिकिमितिकल्प्यतेतुच्छंएवंस्वर्गसंबंधस्यागसंबंधस्यचान्यलाभेपिकेचनस्वर्गसंबंधेसर्वकामव
चनलाभेस्वर्गकामवाक्ययोरुक्तार्थत्वंमन्यमानास्तयोरंगसंबंधबोधनार्थत्वमाहुःअन्येतुस्वर्गकामशब्दसनु
रोधेनस्वर्गमवाक्ययोचस्वर्गसंबंधबोधनार्थत्वंसर्वकामवाक्ययोस्तुसामान्यप्रवृत्तयोस्वर्गतात्पर्यत्वमाहुः
उभयोरन्यतःप्राप्तिसंभवात्तद्व्यतिरेकेणकुत्रचित्कस्यचिल्लायणीयस्यादर्शनात्स्वर्गकामवाक्ययोरुक्त
लक्षणाव्याप्तिःसर्वत्रैवानिवार्यतिभावःअथप्रकारांतरेणोदाहृततदितरापूर्वविधिषव्याप्तिमुदाहरतिना
नाशाग्निहोत्रप्रभृतिविधिषुचाव्याप्तिरेवंसतिस्यात्तद्विध्यप्रवृत्तावपितदनुगतिस्याद्विधेयंतरेणसास
माप्तिस्तत्रैवाभ्युदयफलवतीत्येवमप्राप्तिसंबंधलाभ्यनिरासेननियमपरिसंख्यानुरक्तेर्निवृत्तिः॥अग्नि
होत्रादिविधयस्तावन्नानाशाखासुश्रूयंते॥ततश्चशाखाम्नातविध्यभावेनानाशाखासुविप्रकीर्णानामंगानामि
ग्निहोत्रादीनामपिशाखांतरतःप्राप्तिःस्यादेव॥ततश्चतत्तद्विध्यभावेन्यतःप्राप्तसंभवरूपस्यप्राप्तविशेषणार्थ

९७

स्याभावात्॥सर्वेषपिनानाशाखाम्नातरूपूर्वविधिषव्याप्तिरनिवार्यैव॥ननुशाखांतराधिकरणन्यायेननेषांततश्चाश
खाध्ययनेप्रतिस्वशाखाध्ययनप्राप्यमेनाज्ञातत्वापकत्वंसमर्थितं॥सत्यं॥नत्वज्ञातत्वापकत्वसिद्धिमात्रेणाप्रा
प्तविशेषणार्थोविवक्षितोलभ्यते॥नचाज्ञातत्वमेवाप्राप्तशब्दार्थः॥तथासतिनियमपरिसंख्ययोरप्यर्थाक्षेप
मंत्रलिंगाभ्यांप्रागेवप्रवृत्तयोरज्ञातत्वापकत्वेनतयोरतिव्याप्त्यापत्तेः॥नन्वभ्युदयशिरस्कप्राप्तिसंभवराहि
तप्राप्तमित्यनेनाविवक्षितं॥ततश्चस्वाध्यायोध्येतव्यइतिनियमविधिबलादध्ययनगृहीतस्वशाखांतर्गत
वाक्यजन्यतदर्थज्ञानेस्वाभ्युदयकारित्वेनस्वशाखांतर्गतवाक्यसङ्गावेशाखांतरगतवाक्यजन्यज्ञानस्या
भ्युदयकारित्वासंभवात्तत्तच्छाखाध्यायिपुरुषापेक्षयासर्वेषामग्निहोत्रादिविधीनामज्ञातत्वापकत्ववदप्राप्त
प्राप्तिफलकत्वमपिविवक्षितरूपमस्त्येवेतिनानाशाखाग्निहोत्रविधिषव्याप्तिः॥नापिस्वर्गकामवाक्येघव्याप्तिः।
तेष्वपिसायदर्शवाक्यन्यायेनाभ्युदयफलकप्राप्यभावसत्वात्॥तथाहि॥सायदर्शसामिधेनीरनुब्रूयात्।अना
ख्यादितिश्रूयते॥अत्रविधीयमानस्यसायदर्शस्यनसामिधेनीद्वाराप्रकृतौनिवेशः॥प्राकरणिकपांचदर्श्या
वरुद्धत्वात्किंतुविकृतिष्वेवतत्रापिश्रुतसायदर्शसुमित्रविदादिष्वेवनिवेशोनसर्वासुविकृतिषुअनारभ्यु
तंसायदर्शंयावत्सामिधेनीद्वारासकलविकृयंगकल्प्यतेतावत्प्राकरणिकैर्मित्रविदादिसंबंधेकृतेक्षीणा

ष्वपितिर्नैकत्वंतरसंबंधंकल्पयति॥तेनानारभ्याधीतस्यसाप्तदृश्योस्योपसंहारार्थागतानितत्प्रकरणाम्नातानिसाप्त
दृश्यवचनानि॥ततश्चप्राकारिणिकवचनैःसाप्तदृश्यस्यक्रतुसंबंधसिद्धिःअनारभ्याधीतवाक्यैनसामिधेनीसं
बंधसिद्धिरितिमीमांसकानांमर्यादा॥अत्रानारभ्यविधानाभावेसाप्तदृश्यस्यक्रतुसंबंधवत्सामिधेनीसंबंधो
पिप्राकारिणिकवचनैरेवसिध्यतीत्यनारभ्यविधानस्यवैय्यर्थ्यंशंकाप्राप्नोतिअत्रोक्तंतत्रैव॥यद्यपिप्राक्कर
णिकैरेवक्रतुसंबंधःसामिधेनीसंबंधश्चसिध्यतितथापिवाक्यरत्नाकरेदर्शनादेवविज्ञानमभ्युदयकारिभवती
तिज्ञायते॥अथवादप्रयोचितावगतिवादितितत्रास्यन्यायस्यसावेकाम्यवाक्यप्राप्तार्थकस्वर्गकामकाम्यसारथेष्णात्तत
त्राप्यभ्युदयशरस्कप्राप्त्यभावोवक्तुंशक्यतेइतिचेत्तथासतिनियमपरिसंख्याविध्योरयंतमप्राप्तिसतिविशेषणाभ्यांनिवृत्ति
नेस्यात्तत्रापिस्वाध्यायनियमविधिबलादेवार्थक्षेपमंत्रलिंगाभ्यांवेयातादिप्राप्तेरभ्युदयकारिज्ञानभ्युपगमस्यवक्तुं
शक्यत्वात्तस्मादन्यतःप्राप्यभावमात्रमप्राप्तिविशेषणार्थंप्राप्यभावःतावत्ततविधिमात्रप्रवृत्तावितिनेष्यतेकिंतुविध्यं
तराप्रवृत्तिसहितायांकेवलायांवातद्विध्यप्रवृत्तौयत्प्राप्यभावःससर्वोप्यप्राप्तिविशेषणार्थइतीष्यतेततश्चतेनखा
दिरयागताग्नेहोत्रादिविध्यप्रवृत्तौतदन्यासकलश्रौतयागतत्तद्विध्यप्रवृत्तिसहितायांतदप्राप्तिरस्तेतिननानास्रा

खागताग्नेहोत्रादिविषुधिअव्याप्तिः॥नापिस्वर्गकामविध्योरव्याप्तिः॥तदप्रवृत्तौसार्वकाम्यविध्यप्रवृत्तिसहिता
यांज्योतिष्टोमादीनांसर्वसंबंधाप्राप्तिसहातत्वंसंतेवसंतेज्योतिषायजेतयावज्ञोवेदर्शपूर्णमासाभ्यांयजेतेतिवि
धिभ्यांतेषांप्रसवायपरिहारार्थत्वात्।गमनेततएवफलाकांक्षाश्रौतेर्विश्वजिन्न्यायाविषयतमातत्रस्वर्गसं
बंधप्राप्तेर्नाशंकनीयत्वात्अवश्यंचकुत्रचित्कुत्रचित्नियमविधौतत्तद्विध्यप्रवृत्तेर्विध्यंतराप्रवृत्तिसहितायां
योयमनुसरणीयःअन्यथाव्रीहिभिर्यजेतेतिनियमविधौतल्लक्षणस्याव्याप्तिःस्यात्व्रीहिणास्वामावेयवैश्चाल्ते
णयवानामेवनियतप्राप्त्याव्रीहिणांपक्षप्राप्त्याभावात्॥एवंयवैर्यजेतेतानिनियमविधावव्याप्तिःस्यात्॥तद्
भावेव्रीहिणास्त्रेणव्रीहीणामेवनियतत्राप्त्यायवानांपक्षेप्राप्तभावात्॥तथाऔदुंबरोयूपोभवतीतिवैकृतेविधि
घपिसर्वद्रव्यविधयोनियमविधयइतिमीमांसकमर्यादयानियमविधिनासमर्थानांयेषुतद्व्याप्तिःस्यात्॥वैकृतविध्य
भावेप्राकृतेनखादिरोयूपोभवतीतिशास्त्रेणचोदकृतःखदिरादीनामेवनियमप्राप्तौस्यौदुंबरादीनांपक्षतः॥प्राप्त्यभा
वात्॥ततश्चव्रीहियवशास्त्रयोर्द्वयोरप्यभावेनपुरोडाशद्रव्यप्रकृत्याकांक्षमाव्रीहियवनीवारादीनांपक्षतःप्राप्ता
प्राकृतंवैकृतविधिनामप्रावेयूपादीनांप्रकृतिद्रव्याकांक्षयाधवखदिरपलाशौदुंबरादीनांपक्षप्राप्त्याव्रीहियवौ
दुंबरादीनांशास्त्रेणनियमविधिलक्षणंसमर्थनीयं॥तथापरिसंख्यालक्षणेपिन्यायोयमनुसरणीयः॥अन्यथा

मित्रविंदाध्वरकल्पवेमधवीतुर्मास्यपश्वाद्ययणादिनानाकर्मसमाम्नातेषुसाप्तदृश्यविधिषुगारभ्यविहितसाप्तदृश्यो
पसंहारार्थंतेनतादितरविकृतीनांसाप्तदृश्यसंबंधव्यावृत्तिफलकृतयापरिसंख्यारूपेषुतल्लक्षणाव्याप्तिःस्यात्
मित्रविंदादिगतविध्यभावेऽध्वरकल्पावगतविध्यमित्रविंदादिसाधारण्येनाध्वरकल्पेतरसकलविकृतीनां
साप्तदृश्यसंबंधव्यावृत्तिफलकृतयामित्रविंदायामन्यतःसाप्तदृश्यप्राप्त्यभावात्॥एवमुक्तन्यायेनाध्वरक
ल्पादिषुपितत्राप्त्यभावात्तथागृहमेधीयगतेषुआज्यभागोयजतिअग्नयेस्विष्टकृतेसमवद्यतिइडा
मुपाह्वयतइतिप्राकृतांगपुनर्विधिचोदकपरिलोपकत्वेनतादितरांगानांगृहमेधीयसंबंधव्यावृत्तिफलक
तयापरिसंख्यारूपेषुतल्लक्षणाव्याप्तिःस्यात्आज्यभागविध्यभावेस्विष्टकृद्विधेराज्यभागसाधारण्येनस्वि
ष्टकृदितरसकलचोदकप्राप्तांगानांगृहमेधीयसंबंधव्यावृत्तिफलकृतयाऽज्यभागयोरन्यतोगृहमेधीयप्राप्त
भावात्उक्तन्यायेनैवस्विष्टकृदादीनामर्पितत्राप्यभावात्ततश्चमित्रविंदाविप्रकरणगतसकलसाप्तदृश्यविध्य
भावेऽनारभ्याधीतसाप्तदृश्यविधिनाप्रकृतितःपांचदश्यावरोधात्निवृत्तेनाविरोधात्सर्वासुविकृतिषुसा
प्तदृश्यप्राप्त्यागृहमेधीयप्रकरणगतसकलप्राकृतांगपुनर्विध्यभावेचोदकात्सर्वेषामाज्यभागादीनांगृह
मेधीयप्राप्त्याचतेषुपरिसंख्यादिलक्षणंसमर्थनीयंतद्वत्सकलशाखागताग्निहोत्रविध्याद्यभावेऽग्निहोत्राद्य ११

प्राप्त्यातेषुपूर्वविधिलक्षणंसमर्थयितुंशक्यमेवमतोनकाप्यव्याप्तिदोषइत्याशंक्याह॥ततश्चाध्व प्रकृतौसकलमितरविध्य
प्रकृत्या तायांतेषामप्राप्तिमत्तेनियमपदृश्यव्रीहिपक्षाप्तिताव॥नानाकर्मोपसंहृत्यचितनियमसाप्तदृश्याप्तिवत्ते
तेवंस्तोकुपुष्टस्तुतिनियममुरकानिप्रसक्तिःप्रसर्पत्॥एवमव्याप्तिपरिहारार्थंमनियमेनएकानेकविध्यप्रकृता
वप्राप्तेरपूर्वविधिलक्षणविशेषणकल्पनायामुपहव्यादिविकृतिषुप्रकृतितोविकल्पेनप्राप्तयोःबृहद्रथंतरयोर
न्यतरनियमार्थंबृहत्पृष्ठंभवतीतिविधौविकृतिरात्रेप्रकृतितोविकल्पेनप्राप्तयोःषोडशग्रहतद्भेदयोः॥षोड
शग्रहनियमार्थंउत्तरेहनिरात्रस्यगृह्यतइतिविधौगृहमेधीयेप्रकृतितःसमुच्चित्याप्राप्ताज्यभागतदितरांगकला
पःमध्येचोदकलोपकृत्यातदितरांगपरिसंख्यारूपेआज्यभागोयजतीतिविधौचाप्तिव्याप्तिःस्यात्बृहद्रथंत
रयोःषोडशग्रहस्याज्यभागयोश्चप्राकृतवैकृतविध्यभावेनसर्वथैवाप्राप्तिसत्त्वात्॥व्रीहियवविध्योःवैकृतद्रव्य
विधिषुप्राकरणिकसाप्तदृश्यविधिषुगृहमेधीयस्विष्टकृदादिविधिषुचानेकविध्यप्रवृत्तिमपेक्षयापाक्षिकी
नियतीचप्राप्तिंसंभाव्यनियमपरिसंख्याविधिनासमर्थितेषुतत्तद्विध्यप्रकृत्यपेक्षयासर्वथैवाप्राप्तेरपि
सत्त्वेनतेष्वतिव्याप्तिःस्यात्॥नच्यनेकविध्यप्रवृत्यपेक्षयैवाप्राप्तिरपूर्वविधिलक्षणंनिवेश्यतइतिनियंतुं
शक्यतेनथासतिव्रीहिम्रोक्षतीत्याद्यपूर्वविधावप्राप्तेस्तद्विधिमात्राप्रवृत्यपेक्षितत्वेनतत्राव्याप्तिःस्याद्

तितसरिहारार्थमनियमेनैकाने कविध्यप्रवृत्त्यास्तल्लक्षणनिवेशनीयत्वात्॥तथा चतुर्जुह्वांगृह्णातिअष्टाज्य
भृतीश्चर्धुवायामितिकार्यविशेषासंयुक्तथास्रुवानांजुह्वादीनांविनियोगविधिषुयज्जुह्वातिप्रयाजेभ्य
स्तुयदुपभृतिप्रयाजानुयाजेभ्यस्तत्सर्वसमेवायेतयत्तायग्रहीतेयध्रुवायामाज्य मित्येवंरूपेषुमध्ये जो
हवोपभृताज्यवि नियोगविधोर्नियमविधिहेनाभ्युपगतयानियम विधिहेत्रयाणामेतेषांविधीजामप्र
कृत्यपेक्षयाजुह्वादिनाद्रव्याकांक्षेषुप्रयाजेपक्षतःप्राप्तिंसंभाव्यसमर्थनीयेनतद्विध्युप्रवृत्त्यपेक्षयाविधे
ययोर्जुहूप्रभृताज्ययोःप्रजानुयाजेषुप्राप्तिरपिसंभवति॥सर्वयत्तार्थध्रुवाज्यान्वयेतानिराकांक्षेभ्यःप्रया
जानुयाजेभ्यःपरावृत्तितयोरयत्नरूपेणाज्यापेक्षसदनकरणकार्यंधवप्रवृत्तिरितितयोरपिविध्योरव्याप्तिःस्या
त्॥तवमनियमेनएकानेकविध्यप्रवृत्यपेक्षयापाक्षिकनियतप्राप्त्यानियमपरिसंख्यालक्षणत्वनिविलकल्प
नायांतयोरपिलक्षणयोरतिव्याप्तिस्यात्तथाहि॥ध्रौवाज्यविनियोगविधेर्द्रव्यविषयेऽपिनियमविधिहेनसं
भवति॥जुहूप्रभृताज्ययोःप्रयाजानुयाजार्थेसतिपरिशेषादेवध्रौवाज्यस्यतदतिरिक्तद्रव्यापेक्षासर्वयत्ता
र्थत्वनियमसिद्धैः॥नचस्रुक्स्थाज्यस्यापितेषुपक्षप्राप्त्यापरिशेषात्सिध्येन्नियमविधिहेसंभवतीतिवाच्यंजुहू
द्याज्यग्रहणविनियोगेनानिराकांक्षस्यस्रुक्स्थाज्यस्यस्वस्तस्मिन्प्राप्त्यसंभवात्॥तस्माद्रव्यापेक्षसर्वेषांध्य २०.

सरूपेषुसदनकरणादिषुचध्रौवाज्यस्यसमुचित्यप्राप्तौसदनकरणादिव्यावृत्यर्थंतस्यपरिसंख्याविधिलभे
वयुक्तंतत्रत्रयाणामेतेषांविधीनामप्राप्तौध्रौवाज्यस्यतद्विनियोगविधिसंग्राह्येष्वाज्यभागादिषुपक्षतःप्राप्तिः
संभवतीतितत्रनियमविधिलक्षणस्यातिव्याप्तिः॥तथारथंतरंपृष्टंभवतीतिवैकृतेविधिनियमविधिःतस्य
प्राकृतबृहद्रथंतरविकल्पविधेश्चप्रवृत्तौप्रकृतिताबृहद्रथंतरयोःसमुचित्यप्रवृत्तिःसंभवतीतितत्रपरिसं
ख्यालक्षणस्यातिव्याप्तिः॥तथापृष्ठ्यषडहोबृहद्रथंतरसामकायेइतिगवामयनिकषडहेरथंतरंबृहत्सृष्टविधि
रप्रवैविधिस्तदंतर्गतेषुतृतीयादिषुहःसुतत्सृक्तिभूतान्॥द्वादशाहिकान्नानापृष्टषडहक्रमेणवैरूप्यवैरा
जशाक्वरैवतपृष्टानामवप्राप्तेनतृतीयेरथंतरंचतुर्थेबृहत्पंचमेरथंतरंषष्ठेबृहदितिएतस्यार्थस्यकथंचि
दपिप्राप्त्यभावात्द्वादशाहिकेनानापृष्टविध्यभावेतस्मिन्गवामयनिकषडहेज्योतिष्टोमात्॥बृहद्रथंतरयो
विधिनियमप्राप्तिःसंभवतीतितत्रनियमविधिलक्षणस्यातिव्याप्तिः॥आज्यभागपुनर्विध्यनेनगृहमेधीय
वदर्शवभृथेप्रयाजानुयाजप्राप्त्यभावात्तत्रापबर्हिषःप्रयाजानुयजतिअपबर्हिषावनूयाजोयजतीति
बर्हिर्व्यतिरिक्तप्रयाजानूयाजप्राप्त्यर्थापूर्वविधिः॥तत्राज्यभागपुनर्विध्यभावेबर्हिःसंतप्रयाजानूयाजा
जयोस्तद्व्यतिरिक्तप्रयाजानूयाजानांसमुचित्यप्राप्तिःसंभवतीतितत्रपरिसंख्यालक्षणस्यातिव्याप्तिः॥एवम

तिव्याख्यावहतत्वादनियमेनएकानेकविध्यप्रत्योरपूर्वविध्यादिलक्षणानुप्रवेशकल्पनमयुक्तमितिभावः॥स्या
देतत्॥वैकृतरभंतरपृष्ठादिविधिषु अपूर्वविध्यादिलक्षणानुगतेर्नातिव्याप्तिः नानालक्षणसमावेशानुसार
णानकविधिरूपस्वीकारेणदोषाभावात्तावतारथंतरपृष्ठादिघनुष्ठानभेदप्रसंगात्उपधेयसंकरेपि
तल्लक्षणोपाधीनामसंकर्यात्॥एकैकस्मिन्वाक्येविषयभेदेनापूर्वविध्यादिलक्षणानामुपजीव्योपजीवक
भावेनतत्फलानांचसांकर्यस्यसंप्रतिपत्तेर्नतन्मायेनैकानेकविध्यप्रवृत्तिभेदेनापितदुभयसांकार्याभ्युदय
गमसंभवाच्चतथाहि॥उपांशुयौर्णमास्यांयजन्नितिवाक्येउपांशुयाजाप्रायफलसंबंधप्रापकत्वेनतस्मिन्पौ
र्णमास्यासहप्राप्तामावास्यासंबंधायतेकत्वेनचापूर्वपरिसंख्यालक्षणयाःसांकर्यंतावद्गीकृतंचतुर्थस्ते
कव्याख्याने॥सायंजुहोतिप्रातर्जुहोतीतिविध्योर्नियमविधिपरिव्यालक्षणसांकर्यंदृश्यतेतौखल्वग्निहोत्रं
जुहुयात्स्वर्गकामइतिविहितकाम्याग्निहोत्रप्रयोगस्यनियतकालत्वप्राप्तौकालविशेषनियमार्थौयावज्जीवम
ग्निहोत्रंजुहोतीतिविहितनित्याग्निहोत्रप्रयोगस्यसांतत्येनसर्वकालत्वप्राप्तौसायंप्रातःकालावच्छिन्नमेवजीव
नंनिमित्तमितिनिमित्तविशेषसमर्पणेन्यूनाकालव्यावर्तकौच॥तथा॥अश्वरोदक्षिणेयाग्यपहव्यदक्षिणावि
धिरिहोदाहरणत्वासहिगौश्चाश्वश्चेतिन्यायेनतिष्ठेमकदक्षिणाविधिश्चास्यगवादिभिसमुच्चित्यप्राप्तोगवादिप

रिसंख्यार्थःतस्यानियतरूपप्राप्तौसत्यांनियमार्थत्वयोन्यंतदुत्तरयोर्गौणयतीतिविधाप्यपूर्वेनियमविधिलक्ष
णसांकर्यंदृश्यतेकथंकतौस्तोत्रसाधनानांसाम्नांयथाध्ययनमेकस्यामृचिगानप्राप्तौएकंसामस्तुचेक्रियतेस्तो
त्रीयमितिवचनात्तत्रेतानिगातव्यानितिस्थापितमेकचरुनियतेस्युःस्वाध्यायवत्तत्रचवालिंगदर्शनादिति
पूर्वोत्तरपक्षसूत्राभ्यांदर्शनाध्यायेतत्रचतेषांस्वयोनिषुगीयमानानांकतुसंबन्धयोरपियथैकयाश्रुत्यु
चोगीयतेप्राप्तेसंस्कारविलेशदोषपरिहारार्थंयोनिसमछंदस्कयोरेवगातव्यमितिनिर्णीतंतभ्यासःस्यादिति
नावमिकाधिकरणतत्रेदंवचनंप्रवर्ततेपथोन्यांतदुत्तरयोर्गौयतीतिअत्रयोनिग्रंथपठितयोर्यान्युत्तरयोर्गानं
नविधीयते॥किंतत्तरग्रंथपठितयोस्तदुत्तयोस्तत्रैवोत्तराशब्दस्यपदांतरसन्निधाननिरपेक्षयारूढ्याप्रसिद्धे
रितिनिर्णीतंनैमित्तिकंतूत्तरत्वमितिनावमिकाधिकरणउत्तरग्रंथपठितयोत्तरंरथंतरादियोनीनांतद्विषम छंद
स्केवामदेव्यादियोनीनांतत्समछंदस्केएवंचरथंतरादिसाम्नांसंस्कारविलेशपरिहारार्थमुत्तराव्यतिरिक्तयोरे
वकयोश्चित्योनिसमछंदस्कयोर्गानप्राप्तावुत्तरार्थनियमार्थइतिकोपुनःसंस्कारविलेशदोषोसंस्कारःसाम्नोहि
सारविलेशस्तस्यऋगपेक्षयाल्पत्वेयच्चाधिकछंदस्कायांऋचिसन्नंसामनूनछंदस्कायामृचिगीयतेनरोकेनच्चि

देवसामभागेनऋक्युतेरवशिष्टःसामभागआश्रयाभावाधिस्थेतायदिचन्नूनछंदस्कायानाच्युसलमधिकछंदस्कायोगी
येततस्यसामऋक्पूरणास्मंस्यादितितथासृष्टीरूपदधातीत्यादौत्रिविधलक्षणानासंकरोदृश्यतेकुंसृष्ट्यादिशब्दे
नसृष्टिशब्दादिमन्त्रोपधेयाइष्टकामुच्यंतेतद्वानासाम्युधानोमंत्रइतीष्टकासुतुच्छमतोरितपाणिनीयस्मरणा
तत्तत्रनतावदुपधानेविधीयतेइष्टकाभिरग्निंचिनुतइत्येनेनैवार्थप्राप्तत्वात्इष्टकानामनुपाधनेचयनानिवेतेननुस
थापीष्टकांगत्वेनतद्विधानेसंयुदितानामपीष्टकानांकदाचिदुपधानंप्रामुयात्तन्माभूत्तत्रयेकमेवोपधानमस्ति
त्यर्थमिष्टकांगत्वेनतद्विधानेऽंगवन्निरितिन्यायेनप्रत्येकमुपधानंसिध्यतीतिनेतयुक्तंतत्रैकोपधानविधिनो
दस्ययोजनस्यलाभेनसृष्टीरूपदधातिप्राणभृतउपदधातित्रिचित्रिणीरूपदधातीवत्रिणीरूपदधातीत्यादिवाक्ये
ष्टसकृदुपधानंविधानेवेय्यर्थापत्तेःनचतेषैकत्रोपधानविधिरन्यत्रनेतिवक्तुंशक्यंविनिगमनाविरहात्
नापिसर्वेषुविधीपुनस्तद्दिष्टकाविशेषद्विधिरिष्टकाभिरग्निंचिनुतइतिविधिनैवसर्वासामिष्टकानांप्राप्तत्वेनन्
तथापिमध्यमचितिसंबंधलाभार्थंविशिष्यकासुचित्तद्विधानस्यात्असत्सुहितेषुविधिषुसृष्ट्यादिशब्दोदिता
नांमध्यमचितिप्रकरणम्नातानांइष्टकानांमध्यचिताउपधानंनलभ्यतेसत्सुहितेषुलभ्यतेमध्यमायांतुवच
नात्ब्राह्मणवत्यइतिपंचमाध्यायसूयरगयोवैकांचनब्राह्मणवतीमिष्टकामभिजानीयान्मध्यमायांचिता

वुपदध्यादितिवचनबलेनप्रत्यक्षज्ञानवाच्यभिपूर्वेतानातिवशात्प्रत्यक्षब्राह्मणविहितानामिष्टकानांमध्यम
चितावेकोपधानंनत्वेतुबादरायणइतिन्यायचिलंत्तर इतिनिर्णीतत्वादितिचेत्॥नैतदपियुक्तं॥कासामिष्टकानांस
ष्टमंत्रादिभिरुपधानमितिप्रागनयगतं।तयासृष्ट्यादिशब्दोक्तानांसृष्टिशब्दादिवन्मंत्रोपधेयेष्टकाविशेषा
णांबुध्यनारोहेणविधातुमशक्यत्वात्तत्तन्मंत्रविशेषाएवेष्टकोपधानेविधीयतइतियुक्तं॥तेषांचविधिर्नो
पधानेप्राप्त्यर्थः॥प्रकरणादेवप्राप्तिसंभवात्॥नापिलिंगविनियोज्यमंत्रांतरपरिसंख्यार्थः॥मंत्रांतरास्मानवेर्ध्या
यतेः॥किंवेकयास्तुवेतप्रजापतेरधीयंतप्रजापतिरधिपतिरासीत्॥तिसृभिरस्तुवतब्रह्मवर्चस्यन्नाद्यंब्राह्मणस्यति
रधिपतिरासीदित्यादीनांउपधानेकांतिकलिंगविशेषरहितानांमंत्राणामिष्टकाग्रहणादिघपिविनियोगप्र
सक्तौतत्परिसंख्यार्थः॥प्रत्येकोपधाननियमार्थश्चसमुदितोपधानेतत्तदिष्टकोपधानस्यक्रमाद्भार्यत्वेनस्थि
तत्तत्तन्मंत्रकरणकत्वायोगात्॥मध्यमचितिप्राप्त्यर्थश्चमंत्रव्यतिरेकेणेष्टकासुविशेषांतरानिरूपणेनमंत्रविना
शनेनेष्टकानियमविधेरशक्यतयायोवैकांचनेतिविधेरपीष्टकाविशेषमंत्रविध्यबलवत्त्वात्॥एवंतावदपूर्ववि
ध्यादिलक्षणानांक्वाप्यभेदनसंकरोदर्शितः॥तथैवतत्फलानामपिप्रथमचरमभावेनसंकरोदृश्यतेकेनुकुचि
न्नूकिंचित्फलंक्वचिन्नलभ्यतेष्वनुनिष्पादितादन्येष्वननुनिष्पादितेपिअन्यलभ्यत्वात्॥अपरेघनूनुनिष्पादितेष्व

नुष्ठानविशेषालाभात्सलक्षेनन्यपदिश्यते॥तत्रानुनिष्पादिसंकरोयथाअथातोग्निमाग्नेष्टोमेनानुपजयंतीतिविधिना
प्रकृत्यग्निष्टोमेग्निप्राप्तिस्तदनुष्ठादिनीतस्मिन्नत्याश्रितेगुणकामानांप्राप्तिः॥यच्चप्यग्नेसोमिकांगकलापसंवलितप्रयो
गस्यसोमप्रयोगाङ्गहिःसंपादयितुमशक्यत्वेनतत्प्रयोगमध्यपातिनोवश्यंभावेननिष्फलस्याग्नेःफलवत्सोमांगत
मनुष्ठानसादृश्यरूपेणस्थानेनप्रमाणेनसिध्यति॥तथापितेनानारभ्याधीतस्यप्राकरणिकोत्तरयेवकृप्तप्रकृतिभा
वतस्यविकृतंगत्वमेवसिध्यति॥ब्यतःप्रकृतावप्राप्तस्याग्नेग्प्रथमस्यैककपालव्याख्यानदर्शितरीत्यानेनैववाक्येन
प्राप्तिः॥तत्प्राप्याचतदाश्रितानांश्येनाकृत्यादिफलार्थेगुणानामध्येनुष्ठानप्राप्तिः॥ततोबहिरनुष्ठानुमश्यक्यत्वा
त्॥अग्रयणेच्चावापथिक्याएककपालइतिविधितएककपालयागस्यप्राप्तंदनुनिष्पादेप्रसन्नबर्हिर्नियमः॥प्रसन्
नेपुष्यतेतुनशेषान्मूलासुनरसन्नेवा॥एककपालविध्यभावेस्याग्रयणेप्रसन्नमप्रसन्नेपाबर्हिरनियतंऐंद्राग्नादि
यागानुसारेणप्राप्नोतिऐंद्राग्नादिषुप्रसन्नमियमश्रवणात्॥एककपालविधिसवैतुनस्यवैश्वदेविकैककपालप्रकृति
कृत्वातदादिशेनप्रसन्नमियमःप्राप्नोति॥यच्चप्येककपालोजथन्यत्वेनैककेनचेंद्राग्न्यपेक्षयादुर्बलस्तथापि
प्रसन्नबर्हिर्ग्रहणेप्यनियतबर्हिषामैंद्राग्नादीनांनिरोधावात्कांस्यभोजीन्यायेनैकपालानुवर्त्तनमुपपद्यतएवा
यत्रशिष्यस्यकांस्यभोजननियमोस्तिगुरोर्नास्तितत्रतेयोरेकपात्रभोजनेकचित्सस्तेगुणभूतमपिशिष्यमनुस्र

त्यगुरुणापिहिकांस्यभोजनमेवाश्रियते॥अतिहायेडोबर्हिःप्रतिसमानयतेजुहोमीपभृतमितिबर्हिःप्रयाजोपक्रमेजु
होप्रयाजार्थोपभृताज्यसमानयनप्राप्तिः॥तदनुशिष्यादिनीजोहवाज्यमाश्रित्यप्रयाजत्रयमार्थमोपचेताज्यमुपरितन
प्रयाजहूयार्थमितिपारसंख्या॥यजुष्कांगृह्णातिप्रयाजेभ्यःस्तृणातिप्रयाजानुयाजेभ्यस्तृणातिविधिभ्यां
विहितयोरविशेषेणसर्वप्रयाजार्थत्वेप्राप्तेतेतश्चप्रथमप्रयाजोपक्रमएवप्रयाजार्थस्योपभृताज्यस्यजुष्कांसमा
नयनमपिप्राप्तंतस्यतस्मात्काला॥दाक्षिण्यबर्हिप्रयाजोपक्रमकालेविधानादाज्यद्रव्यमपिप्रयाजविशेषविष
यतयाव्यवतिष्ठते॥एवंचात्रप्राप्तपरिख्यानेपिनत्रदोषः॥अन्यानुनिष्पादितेनशब्दव्यापारविषयत्वात्॥ऋत्विग्
भ्योदक्षिणांदातिआग्नीध्रेदक्षिणांदातिब्रह्मणेदक्षिणांदातीत्यादिषुध्यधीनऋत्विगानमनार्थदक्षिणदाननियमानुनिष्पादनी
कृतिज्ञाकर्मसुकर्तृत्वप्राप्तिः॥स्वर्गकामोयजेतेतिसामानाधिकरण्यादात्मनेपदेनकर्तुरेवफलावगमाच्चफलार्थि
नोयजमानस्यैवसांगेज्योतिष्टोमादिकर्मणिसाक्षात्कर्तृत्वेप्राप्तेतत्राप्राप्तंऋत्विजांकर्तृत्वंदक्षिणादाननियमेनप्राप्य
तेदक्षिणादानविधिर्हिऋत्विगानमनरूपदृष्टार्थत्वेसंभवतिनादृष्टार्थःकल्पयितुंयुक्तइति॥दक्षिणादानेनैव
हिजंघानमपितन्यानतसमाधुपायांतरेणेतिनियमविधिःसंपद्यते॥ततश्चतेषांदक्षिणयापरिक्रीतानांकचि
द्विनियोगोपक्षायांवस्तुसामर्थ्यरूपाल्लिंगाच्चविस्तारदक्षिणादानादृष्ट्यास्तारादन्यत्रकर्मणिकर्तृत्वेनविनि

योगः॥ तत्र योजकत्वेन प्रधानवाक्यावगतयजमानस्यतत्रकर्तृत्वमितिसंपद्यते॥ राजन्यवासिष्ठादीनां नाराशंसोद्धिती
यप्रयाजः सन्ननपादन्येषामिति विध्यधीननाराशंसादिनियमानुनिष्पादीतुल्यकल्यानामेवसत्रेधिकारइतिनियमः
नाराशंसतन्नपान्मंत्रब्राह्मणीयप्रयाजस्थानपठितयोरव्यवस्थितविकल्पेप्राप्तेपुरुषभेदेनतत्रव्यवस्थार्थोराजन्य
वासिष्ठादीनामितिविधिस्तावन्नियमविधिः॥ ततश्चसर्वेधिनाराशंसकल्याइतिवासर्वेपितन्नपात्कल्याइतिवातुल्य
कल्याएवसर्वेधिकुर्युर्नेभिन्नकल्यानांसत्रेसंभूयप्रवृत्तौतदंतर्गतप्रयाजेषन्य
तरकल्यस्यैवाश्रयणीतियाकेषांचिद्धेतुवैगुण्यप्रसंगात्॥ यजुर्होगृह्णातिप्रयाजेभ्यस्तदितिविध्यधीनप्रयाजनि
यमानुनिष्पादितीतत्समुच्चयप्राप्तकार्यातपरिसंख्या॥ अत्रहियथाद्रव्यापेक्षाणांप्रयाजानांपाक्तिकानेकद्रव्य
प्राप्तौजौहवाज्येनैवप्रयाजाःकर्तव्याइत्यपायनियमोस्ति॥ तथाकार्याकांक्षस्यजौहवाज्यस्यपाक्तिकानेककार्यप्रा
प्तौजौहवाज्येनप्रयाजाएवकर्तव्याइतिकल्पनियमोप्यस्ति॥ प्रत्यक्षश्रुत्याजौहवाज्यस्यप्रयाजानांचपरस्परान्व
येहेतुत्वेप्रयाजानांद्रव्याकांक्षायाजौहवाज्यकार्याकांक्षायाश्चशब्दलिंगाभ्यांप्रयाजानामनियतद्रव्यकल्पनस्ये
वजौहवास्यानियतकार्यकल्पनस्याप्यप्राप्तेः॥ तेनचकार्यनियमेनपरिसंख्यापिलभ्यते॥ प्रयाजानुयाजाज्यभा
गोपांशुयाजपार्वणहोमनारिष्टहोमानांद्रव्याकांक्षाणांउपस्तरणाभिधारणकपालोन्नयनसदनंकरणालंकरणानां

२४

चज्याकांक्षाणांकायाकांक्षेषुजौहवाज्यादिषुत्रिष्वेवप्रवर्त्तमानानामध्येप्रयाजेषुजौहवाज्येप्रामुवत्सुअन्येषा
मपिकेषांचित्तैःसमुच्चित्यप्राप्तेरेवनियमाद्वात्॥ नन्वेवंसतिकार्यशेषपरिसंख्येवस्यात्॥ उच्यतेसमुच्चयविशेषनियतोनभव
ति॥ नहिजौहवाज्येएतेषांकार्याणांसमुच्चितानांप्राप्तिः॥ औपभृताज्येएतेषामितिकामविशेषनियमेसमुच्चयेसिद्धेनि
यमकल्पनास्ति॥ अतोयान्येवकानिचित्कार्याणिजौहवाज्येसमुच्चित्यप्रामुवंतिनान्येवतातोन्येषांकेषांचित्कार्याणांतत्र।
समुच्चित्यप्राप्तेनप्रामुवंतीतिकल्पापि॥ कार्यस्यप्रयाजाज्यनियतप्राप्यभावात्तत्र॥ प्रयाजानामप्राप्तांशपूरणंनाव
द्वस्यकर्त्तव्यं॥ यस्मिन्क्रतौनैराकांक्ष्येणलैंगिकल्पनाप्रतिबंधोभवतीतिपक्षेप्रयाजैःसहसमुच्चित्य॥ प्राप्तिमतामन्ये
षांकार्याणांनिरूपितानैरवद्यलादिनिरूपितचतुर्गृहीतत्वादिनीत्यवहिते॥ नमनसालोचनीयं॥ आतिथ्यायाचतु
र्गृहीतान्याज्यानिभवंतिते॥ विध्यधीनांतत्रप्रकृतिप्राप्तोपभृतचतुर्गृहीतांतरपरिसंख्या॥ तद्वन्निष्पादिनीप्रकृतौवर्हिः॥
प्रयाजोपकरणप्रमाजनार्थोपभृतान्यादर्शसमानेतव्यमित्यस्यार्थस्यप्राप्तिः॥ तस्यविधेरभावहियदुपभृतिप्रयाजानुया
जेभ्यस्तदितिविधिवशादोपभृताज्येसर्वमपि॥ प्रयाजानुयाजसाधारणंस्यादिति॥ यमेस्यादश्रुतादितिन्यायेनोपभृते
नुयाजत्रयार्थमर्थाधिकमवद्यंग्रहणीयमितिप्रयाजद्वयार्थमर्थान्यूनमेवसमानेनेतव्यंप्रामुयात्॥ ननूपभृत्यष्टगृही
तमेकरूपविनभवति॥ किंतुचतुर्गृहीतंहविर्दर्शयंयच्चतुर्गृहीतंजुहोतीतिविधिनाचतुर्ग्रहणसंस्कृतस्यांगत्वावगमा

स्थितिनिर्णीतंचतुर्थं॥तथाचयदुपभृतीतिविधिःप्रयाजार्थमेकंचतुर्गृहीतमनुयाजार्थमपरिमित्मस्मिन्नर्थेपर्येवस्येदतःस
मानयनविधिनार्थमेवसमानेतव्यमितिप्राप्तुयादितिचेत्॥मैवंतथाव्यवस्थापकविध्यंतराभावेयदुपभृतीत्यविशेषवि
धानेनूचतुर्गृहीतद्वयस्यापिप्रयाजानुयाजार्थत्वप्राप्तेरनिवार्यत्वात्॥नचैकस्मिन्योगेहविर्द्वयंनान्वेतीतिशंक्यं॥वच
नात्॥बलीदकैकस्य।चतुर्गृहीतस्य।हविषोनैकप्रयाजार्थत्ववदानेकानुयाजार्थत्वंचचतुर्गृहीतद्वयरूपस्यहविर्द्वयस्ये
कैकयागार्थत्वस्याप्युपपत्तेः॥पशुयागएकस्मिन्हृदयाज्जिह्वायैकादशहविरन्वयदर्शनाच्च॥चतुर्गृहीतान्याज्यानि
भवंतीत्यनुयाजरहितायामतिथ्यांविधेःसत्वेतुतेनचतुर्गृहीतांतरपरिसंख्याबलादुपभृतिप्रयाजार्थमेकंचतुर्गृ
हीतमनुयाजार्थमपरमितिव्यवस्थावगमोधर्मेवसमानेतव्यमितिसिध्यति॥ननुचचतुर्गृहीतवचनमातिथ्यायां
प्रयाजार्थमेवचोदकाच्चतुर्गृहीतद्वयप्राप्तौतत्रैकमेवचतुर्गृहीतहविरितिप्रयाजार्थहविषोवैकल्पिकविशेषवचन
तयोपपन्नंनोक्तव्यवस्थागमयेदितिचेत्॥सत्यमुभयथाप्युपपन्नस्यतस्यनत्वत्रानुयाजाङ्गंनतइति
वाक्यशेषवशात्तव्यवस्थाभविष्यति॥अनेनहिवाक्यशेषेणोपभृतिर्द्वितीयचतुर्गृहीताभावेनुयाजनामभा
वोहेतुत्वतः॥ततश्चतच्चहेतोःसाध्यभूतासातिथ्यायामुपभृतिर्द्वितीयचतुर्गृहीतस्यपरिसंख्यामुपनयनविधि
रस्यकेवलानुयाजार्थत्वेप्रथमचतुर्गृहीतस्यकेवलप्रयाजार्थत्वंचव्यवस्थापयति॥अतस्तदनुनिष्पादिन्यर्ध

२५

र्धसमानयनप्राप्तिर्भवत्येव॥त्रीणिहवेयत्तस्यादराणिमागापित्रीरहस्यनुलुप्यत्रैवैवापनिरतएवोह्यंतीत्यत्र
परिसंख्यानुनिष्पादिनियमः॥कयंसतिविरुद्धस्तोमकाङ्क्षत्वंएकविंशेनात्रात्रेणप्रजाकामयाजयेदित्यभिर्विहि
ताः॥नेषुकृतुषुहिंस्यमानादिषुसर्वेषुस्तोत्रेषुकविंशादिस्तोमविधिसिध्यर्थंप्राङ्नेष्वोधिकारोयेप्राप्ते
त्रयेवावपंतीत्यादेस्तत्कर्तृकेनपवमानगायत्र्यादिभ्योन्यत्रावापपरिसंख्यायते॥तेनापापस्यपवमानातिरिक्तै
र्भवेत्॥स्तोत्रेभ्योनिवर्त्तितत्वात्तव्यतिरिक्तेषाज्यपृष्ठादिस्तोत्रेष्वगत्याभ्यासेनैवसंख्यापूरणकार्यमितिसिध्यतिअ
नयाचावापसामान्यस्यस्तोत्रांतरेभ्यःपरिसंख्यायेषुविरुद्धस्तोमकेषुहनुषुप्रत्ययाश्रुतिर्विहितान्यपिकानिचि
त्सामानिसंतिनेषामपिस्तोमविरुद्धयेसर्वस्तोत्रेषुसामांतरावापकर्तव्यप्रसक्तश्रुतिविहितानांसाम्नांस्तोमाधि
क्यपरिहारायप्राकृतसामोद्गापेनतत्स्थानेषावपत्यानांअनियमनयत्रकृत्स्नेत्रेप्राप्तेव्यावर्तयंतद्विषयोऽव
तिष्ठतइति।एवमत्रपरिसंख्यानुनिष्पादीनियमःहृदयस्याद्येवप्यथाजिह्वायाअधरस्यसइत्यादिविधिषु
परिसंख्यानुनिष्पादिनीपरिसंख्या॥तथाहिपशुनायजेतेतिश्रुतेपशोर्यागसाधनत्वंविशसनादिवाक्यबला
दावयवद्वारेणतिनावयवतिष्ठते॥यथासोमेनयजेतेश्रुतेसोमस्ययागसाधनत्वंअभिषवादिवाक्यबालाद्स
हकारेणतिष्ठतइति॥ततश्चपशावयवानांसर्वेषामविशेषाधिष्ठेनावदानप्रोक्षणाद्यर्थेभ्योन्येषामवयवा

नोऽवदानपरिसंख्यामिलभ्यते॥एवंयदुपभृतीतिसामान्यविधिनाचतुर्गृहीतेऽयस्याप्यविशेषेणप्रयाजानुयाजार्थत्वप्राप्तावा
तिथ्यायमुपभृतिचतुर्गृहीतंतारपरिसंख्यायार्थवादसमर्पितानुयाजाभावहेतुसमभिव्याहृतयालभ्याप्रथमंचतुर्गृहीतं
प्रयाजार्थंद्वितीयमनुयाजार्थमितिव्यवस्थापितपरिसंख्यानुनिष्पादनीपरिसंख्यैव॥तत्रतदनुनिष्पादनीसमा ने
तव्यसार्थत्वप्राप्तिरप्यस्तीतिसैवप्रागुदाहृतात्वमनुनिष्पादिफलस्याप्यनुनिष्पादिफलंतरमन्यत्राप्युहनीयं॥इथमनु
निष्पादिसंकरोदर्शितः॥अन्यलभ्यफलसंकरोयथा॥सांग्रहण्यांरात्रिसत्रन्यायलभ्यफलप्राप्तिमूलात्तत्संनिधि
सामान्नातानामनर्थानांतदंगत्वप्राप्तिः॥अन्यथातेषामपिरात्रिसत्रन्यायेनार्थवादिकफलकल्पनयानेराकांक्षे
णतदंगत्वेनसिध्येत्॥उरप्रथस्वेतिपुरोडाशप्रथनंतत्रान्यलभ्यप्रथनप्राप्तिमूलस्तस्याध्वर्युकर्मकत्वनिय
मः॥अप्रथितंहिपिष्टंस्वयमेव॥पुरोडाशाकृतिश्चालितयानप्रथते॥अतःपुरोडाशान्यथानुपपत्तिलभ्यमेव
प्रथनंतत्राध्वर्युकर्तृकत्वनियमःपरंनलभ्यःतस्मादाध्वर्यवसमाख्यालक्षणेनप्रथनेकर्तृनियमसिध्यर्थीध्या
येप्रथनविधिः॥वाग्वाएषायद्दर्वायवाग्राग्रहाग्रह्यंतेवाचमेवानुप्रयंतीतत्रान्यलभ्यप्राप्तिपूर्विकापरिसं
ख्याअत्रग्रहणामैंद्रवायत्वाग्रतानविधीयते॥साहिविधीयमानाधाराग्रहणानामेवविधीयेतनत्वधाराग्रह
योरर्थाश्चैतर्हामयोरपिअप्याधारयागृह्णातीयेतत्संनिधौश्रवणेनधाराग्रहणामेवात्रगृह्णातिनोपादा

२६

नात्॥तेषांचपाठतएवप्राप्तावैंद्रवायवाग्रतांकिंत्वपाठप्राप्तग्रतानुवादेनैंद्रवायवादयोग्रहएवविधीयतेयद्यपि
तेष्वैंद्रवायवंगृह्णातिमैत्रावरुणंगृह्णातीत्यादिक्रमेणपठितैःप्रातिस्विकविधिभिर्लभ्याःतथापितेषामिहपु
नर्विधानंपरिसंख्यार्थं॥कथमेतत्संनिधौशुक्रान्गृह्णातीतिप्रतिज्ञाकामः॥मंथ्यग्राण्यग्निचरन्निष्पादिवा
क्यैर्ग्रहानाश्रित्यशुक्राग्रतादयोगुणाःकामायविधीयंतेतेषांगुणाधाराग्रहवदधाराग्रहावप्याश्रयेणप्राप्त
इतितत्कामंशुक्रादयउपांशुत्वंतयोर्माभ्यामपिप्रापकेभ्याःस्युःअस्मिन्विधानेसतिशुक्रामायविधी
यमानागुणाअनेविधिनाप्राकृतानैंद्रवायवादिग्रहानवाश्रित्यविधीयेरन्नितितयोराश्रयत्वाच्छुक्रादि
यःकामनायामैंद्रवायवादेवग्रागपक्रष्टुमर्हतीतिलभ्यते॥तदेतत्सर्ववेदशाखैंद्रवायवस्याग्रत्वचनादादितःप्र
तिकर्षस्यादितिपेटिकायांनिरूपितं॥ननुनैतदुदाहरणंयुक्तंग्रहाणांक्रत्वर्थत्वस्यान्यतःप्राप्तेरभावात्॥नचैंद्रवा
यवमैत्रावरुणादिग्रहविधीनांज्योतिष्टोमप्रकरणात्तत्वाप्रकरणेनैवतेषांतदर्थप्राप्तिः॥ऐंद्रवायवान्गृह्णीया
धःकामयेतयथापूर्वेप्रजाःकल्पेरन्नितिवाक्येनप्रकरणंबलाधियतेषांपुरुषार्थत्वस्यैवप्रापणात्॥नचशुक्राग्र
तादिवाक्येष्विदंवाग्रतायाएवफलेविधानमितिशक्यं॥शुक्राग्रतादीनांपाठतोप्राप्तत्वादनुवादसंभवेविधेय
त्वस्यैवत्रपाठप्राप्तैंद्रवायवाग्रतानुवादेनधात्वर्थभूतानांग्रहणानामेवफलविधानात्॥शुक्रार्थंविधानसं

मवेत्वाक्यार्थविधानांगीकारस्यायुक्तत्वात्॥कामसंयोगेतुवचनादाहितःप्रतिकर्षस्यादितिदार्शमिकाधिकरणे
तथैवनिर्णीतत्वाच्चतथाचेतद्विध्यभावेप्राप्तिलिंगविधिभिरग्रहणामैनोद्वायवादिग्रहाणांप्राकर्णिकत्व
थैतंबाधित्वाकामसंयुक्तेवाक्येपुरुषार्थत्वमेव॥प्रापयेद्विधिप्राप्तकर्तव्यप्रापणार्थोयंवाग्वाऐषसादिविधिः।
तथाचवाक्यद्वयबालादेर्द्वायवादीनांरवादिरादिवदुभयार्थताभवतिएवंचानेनविधिनाग्रहाणांबाधकबाधे
नेनकर्तव्यतेप्राप्यमाणेकामसंयुक्तवचनोयंकर्मसमाम्नानबलात्तदाश्रयांतरपरिसंख्याप्यनुनिष्पाद्यतद्
प्यनुनिष्पादिसंस्कारेणवेतदुदाहरणंयुक्तंनवान्यलभ्यसंस्कारेतत्रापिवानोदाहरणंधाराग्रहाधिकारादवाश्रयां
तरपरिसंख्यालाभादितिचेत्॥एवंतर्हिनाभ्रतद्दोदाहरणंकपालेषुश्रपयतीयेतदुदाहरिष्यामः॥अत्रन
तावत्कपालविधिर्यदाग्नेयोष्टाकपालइत्यादुसंतिवाक्यतएवतत्सामेः॥अष्टसुकपालेषुसंस्कृतोह्यष्टाक
पालशब्दार्थः॥उक्तसंख्यातार्थेविवक्षायांकपालशब्दस्याष्टशब्देनसंख्यार्थोत्तरपदसमाहारेचेतिसमासे
कृतेष्टाकपालप्राप्तिपरिकात्संस्कृतमित्यर्थेविहितस्याणप्रत्ययस्यद्विगोर्लुगनपत्यइतिलुक्स्मरणात्॥
नापिश्रपणविधिःअपश्रयनपुरोडाशंकर्मभृतेसर्पतमित्यादिवाक्यशेषेणकपालेषुसंस्कार्यस्यपुरोडाश
तावगम्यापूर्वशेषरूपस्यपुरोडाशस्यश्रपणंविनानिष्पत्तेसंभवेनस्वरूपेणश्रपणस्यार्थसिद्धित्वात्॥ २७

नापिश्रपणस्यकर्तव्यतांगत्वप्राप्त्यर्थोविधिःप्रयोजनाभावात्॥नचपुरोडाशविकारेषुचरकरंभादिषुश्रपणस्या
तिदेशेनप्राप्तिःप्रयोजनम्॥तेषामपिश्रपणंविनानिष्पत्तेसंभवेनार्थस्तत्तेलाभसंभवात्॥ननुश्रपणस्यप्रयोग
मध्येनुष्ठानलाभार्थोविधिःस्यात्॥विधानेहिसतिप्रकरणगृहीतत्वेनांगस्यसत्तस्यप्रयोगमध्येनुष्ठानं
लभ्यते॥अन्यथास्याज्यवत्पुरोडाशोपिवहिश्रपणसिध्यएवगृह्येतनत्वेवकपालेषुसंस्कार्यविधानादंतः
श्रपणसिद्धिःबहिश्रपणसिध्यत्येवपुरोडाशस्याज्यस्यगार्हपत्यसंहवनीयोरिवकपालेषुविधिश्रपणस्यादृ
ष्टार्थत्वोपपत्तेः॥नचांगाराध्यूहनादविधिभिस्तसिद्धिः॥एतेषामप्यदृष्टार्थत्वोपपत्तेः॥तथापित्रीहीनि
र्वपतित्रीहीन्प्रोक्षतित्रीहीनवहंतीतित्रीहीणांनिर्वपादिसंस्कारविधानातेषांप्रयोगमध्येपुरोडाशप्रकृ
तित्वेपादानेलभ्यतइतितत्रएवतन्मध्येश्रपणस्याप्यनुष्ठानंलभ्यतइतिचेत्॥नतेषांव्रीहिसाधनकनिर्व
पणयकर्मविधायत्वेनापुपयोगभूतया॥नन्यथासिध्यप्रकृत्युपादानलभकविध्यभावेपुरोडाशस्याप्या
ज्यदर्शपौर्णमासिकजाघन्यादिवत्स्वरसतोयथासिध्यत्येवहिविश्चेनग्राह्यतेप्राप्तेः॥अतएवपशु
सोमाधिकरणेद्रवायवंगृह्णातीत्यादयोयागविधयस्तेषुगृह्णातिकर्मभूतंहविष्यवाण्याधारयग
ह्णातीतिसंनिहितवाक्यश्रुतधारासमर्थेद्रवद्रव्यंतत्रसोमंक्रीणातिसोमंमभिषुणोतिसोमंपावय

तीत्यादिसोमसंस्कारवाक्यपर्यालोचनयासोमप्रकृतिकमवसीयते॥अतःसोमेनयजेतेत्यत्रसोमशब्दस्त्रव्यन्यायेननेपीयागानांनामधेयंयजेतेतितत्समुदायानुवादइतिपूर्वपक्षेअध्याधारायागृह्णातीयेनेनोदकादिसाधारणस्ययथासिध्येद्द्रव्यमात्रस्यहविष्टप्राप्तरत्नन्यथासिध्यप्रकृत्यपादानेलोभविध्यभावेनक्रयादिवान्यार्थकर्मविधायकान्येवस्युर्नतुसंस्कारकर्मविधायकतयाहविषसोमरसत्वायादृष्टानिअतस्तत्स्त्रव्यन्यायोत्रनावतरतीतिद्वयमुक्तं॥तथापिव्रीहिभिर्यजतेतिविधिनाप्रकृत्यपादानंलभ्यतइतितत्रएवप्रयोगतःश्रपणंसिध्येदितिचेतनतस्ययागद्रव्यविधायितयापुरोडाशप्रकृतिद्रव्यविधायित्वाभावात्॥तस्मात्कपालेषुश्रपयतीतिविधिःश्रपणस्यातःकर्त्तव्यतासिध्यर्थःस्यादितिचेत्॥मैवंयागोद्देशेनद्रव्यविधायकस्यापिव्रीहिभिर्यजतेतिवाक्यस्यपुरोडाशाकरध्येयागेसाक्षाद्व्रीहीणांकरणत्वासंभवेनतत्प्रकृतित्वविषयत्वपर्यवसायितयानिर्वापप्रोक्षणादिविधीनामपितद्विषयत्वलाभेनततएवश्रपणस्यप्रयागमध्यकर्त्तव्यतासिध्येः॥नचैवंसतितस्यश्रपणस्यकपालाधिकरणसिध्यर्थंविधिस्यात्नस्यात्॥उक्तरीत्याश्रपणस्यप्रयोगमध्यकर्त्तव्यतासिध्यनुपपत्तिवाक्यावगतस्यकपालेषुसंस्कारस्यश्रपणरूपनासिध्येःदृष्टासंभवेहिनस्यादृष्टार्थाधिश्रपणमा

त्रस्वरूपतापामुयात्॥ननुतथापिश्रपणस्यसमाख्याबललभ्याध्वर्युकर्तृकत्वनियमार्थंस्याद्विधिःस्यादितिचेत्॥नअविदहतःश्रपयतेतिषेबलादर्थेयोरेषिकरुविश्रपणंपुरयोजकंकर्तृकंवेनप्रेषेषुचपराधिकारिनित्यायेनप्रेषितेरध्वर्योरन्यस्यैवपुरोडाशेश्रपणेपिसाक्षात्कर्तृत्वात्॥प्रयोजकंकर्तृतस्यचमत्रेश्रपणंदेवलाभात्॥तस्मादप्रलभ्यश्रपणविधानेनप्रकृत्यपादानमाक्षिप्यक्षिप्तोपादानोक्षितप्रकृतिद्रव्यनियममात्रपरत्वेव्रीहिशास्त्रस्यपर्यवसानद्वारासंकोचेतण्डुलद्रव्यकयागेतत्प्रकृत्यपादानेव्रीहिनियमव्यायत्तेनार्थोयंविधिः॥अस्तितर्यस्मिन्विधौव्रीहिशास्त्रमेवज्ञापयेत्स्वस्मिन्विशेषविशिष्टप्रकृतिद्रव्योपादानपर्यंतमितितण्डुलयागदर्शेलोपेनश्रपणनिवृत्तावपिव्रीहिशास्त्रस्यश्रपणमुखप्रेरणनिवृत्त्याभावेन।चोदकादेगतेरेःसहव्रीहिरूपप्रकृतिद्रव्योपादानमपिप्रामुयात्॥सतिहस्मिनविधौविहितस्यश्रपणस्य॥प्रयोगमध्येनेष्टयेनयातत्रतत्प्रकृत्यपादाने॥ततएवार्थतःसिध्येव्रीहिशास्त्रंप्रकृतिद्रव्यनात्यवस्थाविशेषानियममानार्थंभवति।प्रयोगमध्येप्रकृतिद्रव्याण्युपाददीतेतियतोव्रीहिजातीयानिसनुपावस्थानीति॥तथाचव्रीहिशास्त्रस्यप्रकृत्यपादानप्राप्त्यर्थश्रपणविध्ययेसतेसत्येवंव्यवस्थासिध्यति॥वैकृतेयत्रहविषिश्रपणमेपक्षितंतत्रतस्यप्रयोगमध्येनुष्ठानेयत्रचतत्रप्र

कृतप्रकृतपादानंयत्रप्रकृतपादानंतत्रव्रीहिनियमः॥एवंचसतितंडुलयागादर्थलोपेनश्रपणनिवृत्तौतन्मूलकं
व्रीहिनियमपर्यंतंनिवर्त्ततएवतदाहुः॥तंडुलेभ्योर्थलोपेनश्रवत्रपणानिवर्त्ततश्रपणस्यनिवृत्तस्ययं
कर्तेकातंकथंतदधीरमुपादानेप्रकृतस्यास्कथंतरांतद्व्रीहिनियमःस्तदभावेकथंतमाप्नोतिनन्वस्त्येवंकयालेपुश्रपयतीतिविधिरेवादाहरणे॥अत्रयदुक्तंतदाक्षिप्तप्रकृतपादानापेक्षितव्रीहिनि
यमार्थव्रीहिशास्त्रमितिदुक्तं॥व्रीहिनियमस्यनिर्वापादिसंस्कारविधिभिरबलाप्तसंभावात्॥प्रकृत
पादानंलेभेकृतिध्यभावेहिप्रकृतिद्रव्यानपेक्षणेनानापेक्षितसंस्कारायोगान्निर्वापादीन्यर्थकर्मणिष्व
रितततःप्रकृतिद्रव्यनियमोनसिध्यतिकृपालेपुश्रपयतीतिविधिनाक्षिप्तेप्रकृतपादानेसत्यपादेय
प्रकृतिद्रव्यावशेषाकांक्षायांनिर्वापादिसंस्कार्यंतनश्रुतानोव्रीहीणांचकृचिद्विनियोगाकांक्षायांकथं
व्रीहिणामेवापेक्षितप्रकृतिद्रव्यतेनान्वयानंनियमोनसिध्यत्॥संस्कार्यद्रव्यापेक्षस्यहिकस्यचिद्भो
क्तेवरंसक्तूञ्जुहोतीतिवत्तद्वितीयायवागतगुणकर्मत्वपरित्यागेनार्थकर्मत्वागीकारःप्राप्नुयात्॥तत्सत्वे
तुनार्थकर्मत्वप्राप्तिः॥अतएवोपनयनसंस्कृतस्यमाणवकस्यविनियोगाकांक्षायांउपनयनक्रमाधीनस्या
ध्ययनस्यकर्त्रपेक्षत्वात्कर्त्रैवानन्वयाद्वकृपनयनस्यनार्थकर्मत्वप्राप्तिःउक्तंचपशूद्राधिकरणेस्वाध्या

यविधिरनिर्दिष्टकर्तृकत्वेनकर्त्तारमपेक्षमाणःप्रकृतोपनयनसंस्कृतान्किमर्थंवयमाचार्यनिकटंनीताइत्येवंप्र
योजनमपेक्षमाणानब्राह्मणादीनेवकर्तृत्वेन॥स्वीकुर्वन्तेषामेवाध्ययनंविधत्तेनशूद्रस्येत्यपिचश्रपणवि
धावप्तेपतः॥प्रकृतपादानेप्रसक्तेसत्यनियतप्रकृतिद्रव्योपादानप्राप्तौतस्मिन्दीक्षितेप्रतिनिष्टव्रीहीणांमे
धसुमनस्यमानइतिपुरोडाशप्रतिष्ठापनमंत्रवर्णोदेवछागोयामंत्रवर्णोदितिन्यायेनव्रीहिजातीयंप्रकृति
द्रव्यमित्ययमर्थोलभ्यते॥किंतुलाघवात्तस्यपिष्टावस्थायामुपादानंप्राप्नोतीतिसतुषावस्थायोदानंपरंतनो
नप्राप्नुयात्॥तदपिप्रागुक्तरीत्यानिर्वापयादिसंस्कारकेमध्यापेक्षयालभ्यतइतिनकाचिदनुपपत्तिः॥ननुय
वैर्यजेतयाहयविहिनेयंयैःप्रकृतिद्रव्यकाङ्क्षायांतैर्मंत्रप्रकाश्यत्वसंस्कार्यत्वान्यथानुपपत्त्याव्रीहीणांप्रकृतिद्र
व्यत्वंनसिध्येतत्तत्सिध्यर्थंव्रीहिशास्त्रमपेक्षितमितिचेत्मैवं॥नखलुयवानामपिसाक्षात्प्रकृतित्वंश्रुत॥
किंतुश्रुतपुरोडाशावरुध्यागकरणत्वान्यथानुपपत्त्याकल्प्यतेयं॥व्रीहीणांतुमंत्रप्रकाश्यत्वसंस्कार्यत्वानुप
पत्तेःकोविशेषःसंस्मादनर्थकंव्रीहिशास्त्रमितिचेदुच्यते॥व्रीहिशास्त्राभावेव्रीहिगतापूर्वीयत्वरूपाप्रति
पत्तेः॥संस्कारवाक्यगतेषुव्रीहिपदघटितवैयत्वलक्षणानलभ्येतेतिसंस्काराणांव्यवसायाधारण्यनस्यात्॥स
तिव्रीहिशास्त्रेतुनव्रीहीणांयागपूर्वीयत्वावगतेस्तल्लक्षणासंभवात्॥अवहननादिनिसंस्काराणांयवसा

साधारण्यं सिध्यति॥एवं चयद्यपि व्रीहिशास्त्रेव्रीहिनियमार्थेनस्यात्तथाप्यन्यलभ्यनियम
द्वारायवेषुप्रोक्षणादिप्राप्त्यर्थं॥अवहननादिनियमार्थंचस्या॥इतिअनंतरप्रदर्शनीययोः अन्यलभ्यनियम
मूलकप्राप्त्यन्यलभ्यनियममूलकनियमयोरिदमुदाहरणंभविष्यतीति॥ननुनैतदपियुक्तंव्रीहिशास्त्र
प्रवृत्तौधीनंव्रीहिपदस्यतापूर्वीयत्वलक्षणाभावेपियवसाधारण्यलाभसंभवात्॥द्वितीयाश्रुत्याप्रोक्षण
वहननादिसाध्येनश्रुतानांव्रीहीणांप्राप्तिरेवस्वरूपेणतत्साध्यत्वासंभवात्ततक्रियाजन्यदृष्टवाद
दृष्टसंस्कारविशिष्टतयातत्साध्यत्वासंभवेपितावताफलपर्यवसानाभावादानर्थक्यापत्तेः॥फलपर्यवसा
यिनोरूपांतरस्यचप्रोक्षणादिसाध्यताहिस्यव्रीहिघनुपस्थितेः प्रोक्षणादिभ्यएवस्वतंत्रकल्पनागौरवा
पत्तेः।श्रुतविनियोगभंगापत्तेश्चप्रोक्षणादिसाध्यत्वनिर्वाहार्थमेवसंस्कृतानांव्रीहीणांश्रयावि ध्याक्षि
प्तप्रकृत्यपादानापेक्षितप्रकृतिद्रव्यतयान्वयःकथ्यते॥तन्निर्वाहःकथंस्याद्यदिकल्पमानपुरोडाश्
प्रकृतिभावालभ्यापूर्वसाधनताकारणव्रीहीणांप्रोक्षणादिसाध्यत्वमित्येतावत्पर्यंतमनन्त्यंततथाकल्पने
चप्रोक्षणादीनांयवसाधारण्यंततएवलभ्यतेइत्यास्कविशेषोव्रीहिशास्त्रप्रवृत्तौलक्षितापूर्वसाधनेवेन
यवसाधारण्यंतप्रवृत्तौकल्पितापूर्वसाधनत्वेनउभयथापियवसाधारण्यलभ्यतएवेनवेत्॥नलभ्य ३०

तइतिक्रमः॥व्रीहिशास्त्रसद्भावेसंस्कारवाक्यश्रुतक्रियांसाध्यत्वानिर्वाहायव्रीहिपदानांव्रीहिशास्त्रसमर्प
तापूर्वसाधनत्वेलक्षणयाप्रवृत्तावपूर्वसाधनत्वस्यावहननापेक्षस्तुवादिसाधारण्येनस्तुवादिव्यावर्तना
यतस्मिन्विशेषणीयेव्रीहिगतत्वेनतद्विशेषणेव्रीह्यंशेशास्त्रिरपूर्वसाधनताशेलक्षणेतिवृत्तिद्वयविरोध
प्रसंगात्तंडुलप्रणालिकत्वेनतद्विशेषणीयेतंडुलप्रणाड्यापूर्वसाधनत्वंचयवानुगतमितितद्रूपोद्देशेविधी
यमानानांसंस्काराणांयवसाधारण्यंलभ्यतेव्रीहिशास्त्राभावेनप्रागुपस्थितत्वेनव्रीहीणामपूर्वसाधन
त्वंस्यात्तत्क्रियासाध्यतानुपयोगिनामपिव्रीहित्वेनोपरक्तेषुव्रीहिषुभाविनियोगमूलकतत्क्रिया
साध्यलोपयोरूपसंभावनयासंस्कारवाक्येषुप्रवृत्तेषुतन्निर्वाहार्थंपुरोडाशप्रकृतिद्रव्यत्वकल्पनयाय
द्व्रीहीणामपूर्वसाधनत्वमवगम्यतेतत्स्तुवादिषतिप्रसंगवारणायोपस्थितेनव्रीहिगतनैवविशेषणीय
तुशाकंशब्दसर्पणीयइवकल्पनीयेतस्मिन्नवृत्तिद्वयविरोधाभावात्॥नहिशेषितंचस्तुवादिभ्यइवयवेभ्यो
पिव्यावृत्तमितिसंस्काराणांयवादिसाधारण्यंनलभ्यते॥तथावैकृतेषुनीवारादिषुतेषामतिदेशात्प्राप्त
रपिनलभ्यतेव्रीहिरूपहारभावादतोव्रीहिशास्त्रमन्यलभ्यनियमद्वारायवेषुप्रोक्षणादिप्राप्त्यर्थमव
हननादिनियमार्थंचपर्यवस्यतीतिसमनंतरप्रदर्शनीययोर्द्वयोरपितदुदाहरणमितियुक्तमेव॥अपि

चास्ति व्रीहिशास्त्रस्यान्यदपिप्रयोजनंव्यथाश्चश्राफपरिमाणायशेषकार्येभ्यश्चापर्याप्तानांपुरोडाशजा
तिमात्रसंपादनसमर्थानामाल्यानांव्रीहीणांलोभेतस्यर्याप्तानपिव्रीहिप्रतिनिधीन्नीवारानयाहायमुख्या
नांव्रीहीणामुपादानंतदभावेहिपुरोडाशश्रपणव्रीहिसंस्कारविधिमर्थ्यापुरोडाशप्रकृतित्वेनकल्प्यमा
नाव्रीहयपुरोडाशंगगवमेवप्रतिपद्येरन्नयागंगत्वे॥ततश्चाश्वश्राफपरिमाणास्वष्टकृद्दिडाप्राशनंच
तुर्थीकरणेभक्षणादीनांव्रीहीणांचपुरोडाशंगंगत्वाविशेषणनावसर्यात्रीस्यलाभेबहूनांतेषामंगा
नांबाधाद्दूरमेकस्यव्रीहिरुपांगस्यबाधइतिनीवारोपादानंप्रसज्येत॥व्रीहिशास्त्रसङ्गावेतुतेनव्रीही
णांयागांगत्वेबोधितेपुरोडाशावरुद्धयोगद्रव्यविशेषनसाक्षाद्यागसाधनत्वेमलेप्रमानानांतेषामरुणाधि
करणन्यायेनश्रपणादिविध्याक्षिप्तप्रकृत्यपादानापेक्षितप्रकृतिद्रव्यतयोपाधिकान्वयकल्पनेपि॥क
मएवांगत्वेनतुद्रव्यइतिप्रकृतिपादितमरुणाधिकरणे॥ततश्चबहुभ्योंगेभ्यस्तेभ्योश्चश्राफपरिमाण
शेषकार्येभ्योव्रीहीणांप्रधानांगतयांगगुणविरोधिकरणन्यायेनभाष्यकारोक्तगुणमुख्यव्याप्ति क
ल्पनाद्धिकरणन्यायेनचप्राबल्यतद्बाधनमनुचितमितिसंख्यानामपिव्रीहीणामुपादानंप्रतिनिधिपादा
नाधिकरणेनलभ्यते॥एवंचव्रीहीशास्त्रमुसातिशिष्टपुरोडाशेननिरपेक्षंयागेप्राप्तिरहितानांव्रीही ३१

णांप्राप्तिंकुर्वतेतेनिर्वाहायलभ्यपुरोडाशप्रकृतिद्रव्यातिमात्रतरणेपियागांगत्वाऽपरित्यागाव्रीहीणांपुरोडाशपरिमाणशे
षकार्यापन्नावयुपादानंप्राप्नुयातीतिप्राप्तानुनिष्पादितान्प्राप्तावेष्यतुदुरुद्धरणंभविष्यतीत्यलंप्रसक्तानुप्रसक्त्या॥
प्रकृतमनुसरामःपांशुपोणमास्यामजानित्रत्रानरालविधिसामर्थ्यलभ्यंपौर्णमासीकालनियमपूर्विकामावास्या
परिसंख्यातत्रापिपौर्णमासीकालविधेनोपांशुयजस्फलसंबंधप्राप्तिर्दर्शमावास्यपरिसंख्यापेलभ्यतइतिसं
मर्थितंचतुर्थेश्लोकेव्याख्याने॥हेआहवनीयइत्यत्रान्यलभ्यपरिसंख्याम्नातोपराग्निकर्तृकोहोमानांफलसंबंधप्राप्ति
रयमपित्रैवसमर्थिता॥एकादशापशोरवदानानितानिहिरण्यतीत्यत्रान्यलभ्यपरिसंख्याम्नातोनियमकर्तृक
र्तृपौर्णमासंयाहिरण्यंवपत्तीतितावत्परिसंख्या॥अवदानेहिचतुरवत्तंजुहोतीतिविधिबलाद्धोतव्याधावष
एवचरवदानंप्राप्नुयात्तत्रज्ञापकंहविषोहिरण्यवदानेसंस्कारणंनिधारणंचावदानविधिप्राप्तप्रचयशिष्टसंख्या
नुवादश्चानुग्राह्यसिध्यतिइदंचह्यवदानंपांशुकेष्वहरयादिष्वपिप्राप्तोयेबाध्यायितानिधिरक्ष्यन्तीतिश्रवणनि
यमप्राप्तोनियमार्थेपशुप्रकरणेहियद्यपिचतुरवत्तीयजमानपंचावत्तेवपाकार्येश्रूयतेतत्रपांशुकावदा
नमात्रमुद्दिश्यनतुवपावदानमेवहविराधिकरणन्यायेनउद्देश्यवपाशिष्टशेषत्वाविवक्षितत्वात्॥ततश्चसर्वेष्व
पांशुकाच्यदानेयुर्हिरण्यवदानत्रितेनोपस्तरणंध्रुवावप्ययाभिर्हिरण्येशकलेनवापंचसंख्यासंपादनीयेतिप्रा

कृतस्यश्रवदानस्यनियमप्राप्तेस्तत्रनियमश्रुतेरवीषियथाप्रकृतिदिरेवाबध्नातिपंचसंख्यातुप्रकारेणसंपाद
नीयेति। अग्निहोत्रंजुहुयात्स्वर्गकामेतदभावेपितत्स्वार्थमनादरादितिविश्वजिदधिकरणपूर्वपक्षंन्यायेन
निर्दिष्टफलस्यअग्निहोत्रस्यविनिगमनाविरहेणसर्वफलार्थत्वप्रापयतास्वर्गार्थत्वस्यापिप्राप्तिसंभवात्॥
नापिस्वर्गेतरफलसंख्यार्थं॥तस्यापिसस्वर्गःस्यात्सर्वान्प्रत्यविशिष्टत्वादितिसिध्यातन्यायलभ्यत्वात्।अ
तोअग्निहोत्रस्यान्यलभ्यस्वर्गसंबंधबोधनद्वारातत्संन्निधिसमाम्नातानामनिर्दिष्टफलानांकर्मणां॥फल
वदफलान्यायेनतदंगत्वप्राप्त्यर्थमेतदभावेहिअग्निहोत्रस्यविकल्पायेनफलकल्पनेविनिगमनाविरह
तेषामपितेनैवन्यायेनफलकल्पादिति तेषामग्निहोत्रांगत्वंनप्राप्नुयात्॥एवंचअनेनविधिनाग्निहोत्रस्या
न्यलभ्यस्वर्गार्थत्वप्राप्तिनांतरीयकतयानिश्चजिदधिकरणपूर्वपक्षन्यायप्रसक्तस्यफलांतरस्यपरिसंख्यातसि
ध्यातन्यायलभ्याप्राप्यतेअग्निहोत्रसंन्निधिसमाम्नातकर्मणामनन्यलभ्यतदंगत्वप्राप्तिनांतारीयकतयातेषा
मपिस्वर्गफलार्थत्वस्यतसिध्यातन्यायप्रसक्तस्यपरिसंख्यानन्यलभ्याचप्राप्यतइत्येवमात्रान्यलभ्यपरिसं
ख्यापूर्वकाननन्यलभ्यापरिसंख्यायद्यग्निहोत्रस्ययावज्जीवंवाक्येनप्रसवायपरिहारार्थंत्यागश्रुत्यातस्यातत्सं
न्निधिसमाम्नातकर्मणांचफलाकांक्षांगतेर्विश्वजिदधिकरणपूर्वपक्षसिध्यातन्यायेयोरुभयोरपितवतेषु ३२

वानवतारादिवाक्यमग्निहोत्रस्यस्वर्गसंबंधप्राप्त्यर्थमेवानन्यलभ्यतदंगत्वप्राप्त्यर्थेनापितदनुनिष्पादिन्य
त्वाननन्यलभ्यतेषांस्वर्गार्थत्वपरिसंख्यास्तीतिमतंतदाकेवलकाम्यकर्मणांयस्वर्गसंबंधविधानंतद्विश्वजि
त्न्यायलभ्यस्वर्गसंबंधमनिरूप्यतत्संन्निधिपठितकर्मण्यंतदंगत्वप्राप्तिपर्यवसायीतिनत्रान्यलभ्यपरि
संख्याद्वारानन्यलभ्यपरिसंख्याफलसंकरउदाहर्तव्यः॥एवमन्यलभ्यफलसंकरोदाहृतः॥अप्रवृत्तिवि
शेषकरफलसंकरोपिदिग्मात्रेणोदाहीयते॥ह्यदश्वाहिक्रियोअनेकांतर्गतयोर्गोवामथनिक्रियोस्त्रष्टीकास्था
नगतयोश्चादिमाग्रतावाविध्योरप्रवृत्तिविशेषकरप्राप्तिपूर्वकोप्राप्तिः॥तैर्विधिभिःपरमापूर्वसाधनत्वंछेद
नावांतरापूर्वसाधनत्वंछेदनचाग्रतानांप्राप्तिरनन्यलभ्याक्रियतेनतयाप्रवृत्तिविशेषकृःस्यात्॥ह्यदश्वा
हृगवामयनयोरनन्यलभ्यःप्राप्यतेनैःप्रापणीयस्यह्यदश्वाहिकद्रश्वरात्रांतर्गतयोराश्वमेरिद्वायवश्व
ग्राग्रत्वानुष्ठानस्यचोदकान्गवामयनिक्रियारद्वैरिद्वायवश्वक्राग्रत्वानुष्ठानस्यत्रयीकाविधानाच्चला
भसंभवात्॥किंतुतयानयातत्तधिकारेषुप्रवृत्तिविशेषपर्यवसायिनीप्राप्तिःक्रियते॥एतच्चप्रथमश्लोकव्या
ख्यानेस्पष्टमुक्तं॥सामान्यश्रुतीतेत्यत्राप्रवृत्तिकविशेषकरप्राप्तिपूर्वकोनियमः॥कथंत्रुग्क्षरासरुद्गीति
क्रियारूपस्यसाम्नःकेवलंत्रुग्क्षराभिव्यक्त्यर्थत्वमेवप्राप्तंनतुत्रुक्साध्यगुणनिष्टगुणाभिधानालक्कस्क्रस्

र्थतेमपितदनेनैवविधिनाप्राप्यतेतत्रापूर्णेनचतत्रकश्चित्प्रयुष्टानेविशेषोनलभ्यते॥गीतिक्रियायास्तुतेःसाक्षा
न्निर्वर्त्तयितुमशक्यत्वात्॥अतःक्रमप्रकरणाभ्यांस्तोत्रांगत्वेनावगतानामृचामभिव्यक्तिंकुर्वत्सामतद्द्वारास्तु
तिर्निर्वर्त्तयितुंशक्नोतिइतिश्रुतस्कृत्यर्थत्वनिर्वाहकानुष्ठानविशेषलाभायपार्ष्टिकान्वयन्यायेनस्तुत्यर्थसुक्र
ष्वपवतरति॥ऋगाभिव्यक्त्यर्थत्वेतुसामाःप्रत्यक्षावगतमितिनतत्राप्राप्तप्रापणविधिनाकार्यीमपितु
ऋचामभिव्यक्तौसामवद्ग्रानुस्वयोस्वपायांतराण्यपिसंतीतिपक्षेप्राप्तस्यसाम्नोनियमःकार्यःअतोऽत्रा
प्रवृत्तिविशेषकरस्तुत्यर्थत्वप्राप्तिपूर्वकःस्तुत्यर्थऋगभिव्यक्तिउपायत्वेनसामनियमः॥यद्विरथं
तरसामासोमःस्यादैंद्रवायवाग्रानग्रहीष्यादित्यत्राप्रवृत्तिविशेषकप्राप्तिपूर्विकापरिसंख्या।
इदंहिनतावद्रथंतरसाग्निज्योतिष्टोमेऐंद्रवायवाग्रत्वप्राप्त्यर्थंपाठक्रमादेवतत्रतत्प्राप्तेःसिध्यतात्॥ना
पिबृहत्साग्निज्योतिष्टोमेतन्नाभ्यादित्येवमर्थे॥यद्विबृहत्सामाशुक्राग्रानिति बृहत्सामत्वपक्षेशुक्राग्र
त्वविधानादेवततोव्यावृत्तिसिद्धेः।किंतुनैमित्तिकतोर्थतस्येदंपुनर्विधानं॥पाठाच्चैंद्रवायवाग्रत्वमने
मित्तिकंप्राप्नोतितदेवरथंतरसामत्वनिमित्तकंक्रियते॥एवंप्रकृतौपाठप्राप्तस्यैंद्रवायवाग्रत्वस्यानेनवि
धिनानैमित्तिकीकरणादेवबृहदादिग्रहेष्वनीकायामाद्यस्याहश्चोदकप्राप्यमनैमित्तिकमैंद्रवायवाग्रत्वंना

३३

स्तीतितत्रतद्विधानंविकल्पेक्षितंविध्यंतरेणकृतंतेनचनैमित्तिकीकरणेनज्योतिष्टोमेनकश्चिदनुष्ठानवि
शेषोलभ्यते।किंतुतस्मिन्याठप्राप्तस्यैंद्रवायवाग्रत्वस्याविशेषेणसर्वासुविकृतिषुचोदकालाप्तोबृहद्रथं
तराद्यसामभ्यश्चविकृतीर्योनिमित्तराहित्येनतव्यावृत्तिर्लभ्यतइत्येवमत्रापिप्रवृत्तिविशेषकरनैमित्तिकत्वप्राप्तिपू
र्विकैंद्रवायवाग्रत्वस्यनिमित्तरहितविकृतिभ्यःपरिसंख्या॥अप्रवृत्तिविशेषकरनियमपूर्वकाःप्राप्तिनियम
परिसंख्यायथा॥यस्यर्क्सेदयजुर्वेदयोःश्रयमाणस्यसोमविकारस्यान्यतरत्रांगभूयस्त्वाभावेनभूयस्त्वेनोभ
यश्रुतावृक्लक्षणनिगमनाविरोधेनोभयत्रापिविधिःस्वीकर्त्तव्यस्तत्रोच्चैर्ऋचाक्रियतेऽपांशुयजुषेतिविहितयो
र्विदस्वरयोर्विकल्पेप्राप्तेतस्मिन्नृक्लक्षणतःप्राप्तमुच्चैस्त्वंकिंचित्प्राचीनमग्नीषोमीयातेनोपांशुचरतीतियज्ञभाग
स्वरविधिर्नियमविधिरापद्यते॥सचकर्मणिसाक्षात्स्वरस्यानुष्ठातुमशक्यत्वात्पार्ष्टिकान्वयेनोपांशुत्व
स्यकर्मांगत्वनिर्वर्तनंदंगमत्रश्वतरति॥तेनयेकेवलमृग्वेदोसामवेदोवाविहितास्तन्मंत्रास्तेपूर्वोक्तस्यै
वप्राप्तवेनाप्राप्तस्यैवोपांशुत्वस्यप्राप्तिर्भवतियेतुमंत्रायजुर्वेदेपिविहितास्तेषांनियतप्राप्तस्योपांशुत्वस्यनि
यमोभवतितेनैवोपांशुत्वनियमविधिनादीक्षणीयादिषुचोदकप्राप्तानांमेष्टिकानांमंद्रमध्यमोत्तमस्व
राणांपरिसंख्यापिलभ्यतइत्येवमप्रवृत्तिविशेषकरनियमपूर्वकप्राप्तिपरिसंख्यानांतिसृणामापविकृति

विशेषप्राप्तयज्ञभागस्थरविधिरेवोदाहरणं॥इदं च सर्वमनुपदमेवस्फुटीकरिष्यते॥अप्रवृत्तिविशेषकरपरिसं
ख्यापूर्विकाःप्राप्तिनियमपरिसंख्यायथादीक्षाःसोमस्यदक्षिणाःसोमस्येतिकर्तृसंस्करूपायादीक्षायाःक्रतु
रूपप्रयोगांगत्वादक्षिणायाःसाक्षात्प्रयोगांगत्वाच्चप्रयोगांतर्गतप्रधानेसोमयागेतदंगकलापेचज्योतिष्टोमप्र
रणविहितस्यदीक्षादक्षिण्यस्यशेषिणिप्राप्तेवचनद्वयमिदमंगकलापस्यतच्छेषित्वव्यावर्त्तनार्थमितितावदुभय
त्रापिपरिसंख्यानिर्विवाद॥सा चनज्योतिष्टोमेप्रवृत्तिविशेषकरीदीक्षादक्षिणस्यांगंप्रधानार्थत्वेकेवल
प्रधानार्थत्वेचऋत्वंगभूतयमनियमसंकल्परूपदीक्षानुष्ठानेआग्नेयोवैष्णवमेकादशकपालेनिर्वपेद्दीक्षि
ष्यमाणइतितदर्थविहितदीक्षणीयाद्यनुष्ठानेदैक्षीदीक्षणीयंतीत्यादिवचनविहितदभिव्यंजकदंडधा
रणाद्यनुष्ठानेद्वादशरात्रतदक्षिणादानेचविशेषाभावात्॥नचदक्षिणांगप्रधानार्थत्वेंगप्रधानकर्तृभ्योदेया
केवलप्रधानार्थत्वेप्रधकर्तृभ्यएवेतिविशेषवक्तुंशक्यतेयतःकेवलप्रधानार्थत्वेपिअंगकर्तृभ्यऋत्विग्भ्य
एवदेया॥ननुप्रधानकर्त्रेयजमानायतस्यस्वतएवफललाभायप्रधानानुष्ठानेप्रवृत्तस्वदक्षिणादानेनाना
र्पितव्यत्वात्॥यजमानेनात्मनिसंकल्प्यमानस्यदक्षिणाद्रव्यस्यसत्वत्यागासंभवाच्च॥किंतुसोमागविकारेषुकाम्य
पश्वादिष्वतिदेशेनदेक्षुपशुधर्मादेप्राप्तोदीक्षादक्षिणतेभ्योव्यावर्त्तयतेयेवानुष्ठानविशेषोपयोगिनोऽतोत्र ३५

प्रवृत्तिविशेषकरीसोमागेषुदीक्षादक्षिणपरिसंख्यामुपरचीकृत्यप्रवृत्तासोमांगविकारेषुतत्परिसंख्या॥नन्वत्र
सोमांगविकारेषुदक्षिणापरिसंख्याऽनुपपन्ना॥सोमांगस्यश्रीसोमायपशोर्विकारेषुअनुक्तदक्षिणेघका
म्येनेमिकादपशुपुरुडाशिगानमनापदक्षिणापेक्षायांस्वप्रवृत्तावंगभूतदक्षिणायांचसत्यांतत्रप्रसंगादुप
कारत्वेप्रतिपन्नायाःसोमांगदक्षिणायाएवग्राह्यत्वादितिचेत्मैवं॥तथासतिदक्षिणाःसोमस्येत्यस्यैतत्वेष
र्थ्यप्रसंगात्॥साक्षात्सकलावदृष्टमपेक्षितंमूलप्रकृतितोग्राह्यमितिन्यायात्तोक्ष्यादिषुदृष्टेनतद्दृष्टेनधिताना
हार्यदक्षिणाग्रहणोपपत्तेश्च॥एवंचानुक्तदक्षिणकाम्यादिपशुभ्यःसोमिकदक्षिणापरिसंख्ययाप्रोक्षितोन्वा
हार्यनियमःप्राप्यते॥ततश्चदृष्टस्यादृष्टोपकारार्थंतदीयधर्मजातमपिप्राप्तेइतिअप्रवृत्तिविशेषकरसंख्या
मूलप्राप्तनियमयोरप्येतदेवोदाहरणं॥ननुविधीनामप्रवृत्तिविशेषकरफलेनपर्यवसानमितितोन्य
फलंयदिमृग्यतेदापशुपोषेणमांस्यायज्ञेनित्यायुदाहरणेषुपशु॥यागादीनांस्वर्गेसंबंधादीनांप्राधान्यप्रा
प्तिः॥फलेनस्यात्॥तेषांप्राधान्येफलांगहेचानुष्ठानेविशेषाभावादितिचेन्मैवं॥प्राधान्येसतितत्प्रयोक्तृप्र
धानविस्मरणादिप्रायश्चित्तप्राप्तिविकृतिषुचातिदेशं॥निवृत्तिरित्यादिफलांतरपर्यवसानस्यतदापिवक्तुंश
क्यत्वात्॥एवंमाश्रयभेदनविधिनियमपरिसंख्यालक्षणानामाश्रयभेदप्रयुक्तचरमभावाभ्योंतफलानांच

सकरोदर्शनतः॥ किंनैवत्वाश्रयभेदंतत्रैवोदेश्यतस्यैवविधेयस्याप्राप्तिपक्षप्राप्तिभ्यामपूर्वविधिनियमविधिलक्षण
साकयमपिज्योतिष्टोमगतेयत्नभागस्वरविधौदृश्यते॥यथाहियद्यपिज्योतिष्टोमस्ययाजुर्वेदिकत्वात्सांगस्य
तस्ययजुर्वेदविहितत्वोपाधिनाशुक्लरक्तमुपांशुयजुषेतिवेदस्वरविधिनेवसिध्यंतथाप्यग्नीषोमीयाप्राचीनेषु
तदंगेषुयजुर्वेदविहितत्वोपाधिमनपेक्षस्वरूपांशुत्वस्यप्राप्त्यर्थीयत्नभागस्वरविधिःततश्चऋग्वेदनसेभिवेदन
वाविहितेज्योतिष्टोमविकारंप्राप्नुवत्स्वपितेषुयंविधिप्रवर्त्तते॥ननुयाजुर्वेदिकस्वरविधिरिवनप्रवर्त्ततेय
जुर्वेदविहितत्वोपाध्यनपेक्षत्वातेषुचप्रकृतेमानोपमपूर्वविधिःसंप्रपद्यतेऋग्वेदसामवेदविहितऋंगि
भावमापन्नेषुतत्तद्वेदविहितत्वोपाधिकोऽयंस्वस्यप्राप्त्यकथंचिदुपांशुत्वप्राप्त्यभावात्॥यजुर्वेदनपदा
तेरणचविहितेज्योतिष्टोमविकारंप्राप्नुवत्सुनतेषुप्रकामानोयविधिर्नियमविधिःसंपद्यतेषुयजुर्वेदवि
हितत्वोपाधिकस्यापांशुत्वस्यापिपक्षेप्राप्तिसत्वात्॥तदेवमस्मिन्यत्नभागस्वरविधौविकृतिविशेषप्राप्तिस
यंतेरणैवाश्रयभेदमपूर्वनियमविधिसंकरोजायतेयद्यप्येषविधिरग्नीषोमीयाप्राचीनेष्वपिप्रवर्ग्यतद
गेषुनप्रवर्तते॥उच्चैःप्रवर्ग्येणचरंतीतितेषानुस्रुविधानात्॥दीक्षिणीयादिप्रधानेष्वपिनप्रवर्त्ततेयावत्सा
वाचाकामायेतनावत्यादीक्षिणीयायामनुब्रूयान्मंत्रंप्रायणीयायामंत्रांतरमितिध्यायामितितेषामपिरांतरवि

३५

धानात्॥तथापिप्रवर्ग्यतदंगव्योरीक्षणीयादिप्रधानव्यतिरिक्तेषग्नीषोमीयाप्राचीनेषंगेषुप्रवर्त्तत एव॥
ननुप्रवर्ग्योगवतेदीक्षणीयादीनामंगानिकिमितिनपर्युदस्तानि॥उच्यते॥प्रवर्ग्येणेतितृतीयासंयोगासंव
र्ग्यकर्णिकायांभावनायामुच्चैस्त्वविधिस्तदंतर्गतानिचांगानीत्यूच्चैस्त्वस्यांगप्रधानार्थतायथास्वयमर्थेनच
रंतीत्यवभृथकरणियोभावनायोविधीयमानानामपांनतथेहतृतीयासंयोगोस्तिअतोयथायत्नाथवैणवे
काम्याइष्टयस्तासूपांशुकर्त्तव्याइत्यत्रभूतमुपांशुत्वंकाम्यशब्दोक्तानांप्रधानानांविधीयमानतेषामेव
भवति॥एवंदीक्षणीयादीनांविधीयमानास्वरोपिदीक्षणीयादिशब्दोक्तांनांप्रधानानामेवभवतीत्यास्त
विशेषःवैश्वदेवेप्रधानमात्रविषयेसतिकाम्येव्यंगेषुदर्शपूर्णमासयोःप्राकृस्विष्टकृतःप्रथस्ता
नेनमध्यमेनेडायाःशेषंतृतीयस्थानेनेमिनेतिविहितंसरवैचित्र्यंचोदकात्प्राप्तंदीक्षणीयांगेषुतुतद्
पिद्याधित्वावैश्वदेविकायत्नभागस्वरविधिःप्राप्नोतीति॥एवंचप्रवर्ग्यतदंगदीक्षणीयादिप्रधानव्यतिरिक्ते
ग्नीषोमीयाप्राचीनेषंगेषुप्रवर्त्तमानोयत्नभागस्वरविधिः॥प्रकृतिविकृतिकरूपयाजुर्वेदिकक्रतुगतेषु
याजुर्वेदिकत्वोपाधिनाप्राप्तमप्युपांशुत्वंस्वरूपेणप्रापयनपूर्वोविधिर्भवतिऋग्वेदसामवेदविहितक्रतुग
तेषुकथमप्यप्राप्तत्वात्॥यजुर्वेदतदितरवेदविहितक्रतुगतेषुपक्षप्राप्तेनयंनियमविधिर्भवतीतिव

कव्यएवात्रपूर्वनियमविधिःसक्रःस्यादेतत्दीक्षणीयादीनामंगेषुचोदका।नीतेनेष्टकस्वरेणतनूपत्नीविप्रयोग
वचनाश्रयस्य वेदस्वरस्यापवादेप्राप्तेतस्यतिप्रसवार्थायज्ञभागस्वरविधिर्नतुयाज्युर्वादिकृचानपक्षापांशुतवि
धार्थअयंतावत्प्राप्तविधानात्प्राप्तप्रतिप्रसवविधानस्यलघुत्वात्॥अतएवहविष्कृतेश्रपणविधिःप्राकृतश्रपण
स्यस्वकारकेणाप्राप्यमाणस्यप्रयोजनाभावान्निवर्त्तमानस्य प्रतिप्रसवार्थः नत्वयंतावत्प्राप्तश्रपणविधानार्थो विधि
गौरवापत्तेरितिप्रावृत्तिश्रपणधर्माणांतत्रप्राप्तिरुक्तातत्रराद्धे॥नन्वेवंवैतियज्ञभागस्यस्वरविधिरेष्टिकर्म
मात्रविषयःस्यात्तेत्रैवापवादप्राप्तेरग्नीषोमीयप्राचीनसमस्तांगविषयोनस्यादितिचेन्॥माभूद्विधिला
घवानुसारेणतन्मात्रविषयोस्त्वंगीकृतेहिनिगदाधिकरणेनियमविधिलाघवानुसारातेऽपांशुयजु
षिनिवाक्यंनिगदातिरिक्तयजुर्विषयमितिअंगीकृतंपत्नीसंयाजाधिकरणेपत्नीसंयाजातान्यहानिसंति
ष्टतइतिहादशाहिकंवाक्यंनियमविधिलाघवानुसारात्मागुक्तमादृतःपत्नीसंयाजातत्रविधायिकमि
ति॥तस्माद्यज्ञभागस्वरविधेरष्टिकर्मव्यतिरिक्तेषुप्राप्तभावात्तेषुप्रवर्त्तमानेनतस्मिन्विधिनियमलक्ष
णंकार्यमिहकर्मेतिचेदुच्यतेयद्किंचिदितियदितिशब्दवद्विभाषायांप्रसिधः।वीप्सायांव्याप्तुंसाकल्येन
संबंधुमिछातेयाचयद्किंचित्यनेनाग्नीषोमीयप्राग्भावर्त्तिनःसकलस्याप्यंगस्योपांशुत्वंबंधेतसर्व

वसीयमानेकर्मणिकिंचिद्विषयंतयासंकोचःक्रियेतयद्यप्युच्चैःप्रवर्ग्यंपचरंतीत्यादिनिरवकाशविध्यंतरबलात्संकोचो
स्तितथापिलाघवमात्रानुसारात्सनयुक्तः॥नहिलाघवमस्तीतिश्रुतेर्हातुंशक्यं॥ननुयद्किंचिच्छब्दोवीप्सार्थंदृष्ट्वा
ज्ञातोपिप्राग्भवीयं।कर्मास्माकंकिंलिंगमितिप्रत्ययंवत्प्रसिध्यत्यस्तिचात्रप्राग्भववर्त्तिनामंगानांविशिष्यात्मा
नंप्राचीनमितिशब्देनप्राग्भावस्यवत्कर्मत्वंनामंगानामानिर्दिष्टत्वात्तथाचयद्किंचिदितिसत्तात्तत्सन्नादरणी
यत्वादिबोधनद्वारात्राज्ञातत्वबोधनेप्रयोजनाभावेनप्रवर्तिविशेषकरस्यसाकल्यार्थत्वस्यैवग्राह्यत्वात्॥य
द्किंचिदानीसाकल्यार्थकत्वेवयद्किंचिज्जगत्यस्मिन्श्रयतेदृश्यतेपिवा॥प्राप्तंकर्मणस्ययद्किंचेहक
रोत्यमिसादीनत्वदेनप्रतिनिर्देशस्यदर्शनाच्चविशेषाज्ञातेविशेषानादरणादिमात्रपरत्वे॥यद्किंचिदितियद्किं
दानइत्यादीनत्वदेनप्रयोगात्॥अतःप्रवर्ग्यंतदंगदीक्षणीयादिव्यतिरिक्तसकलप्राग्भाववर्त्तिनांसाधारणयाज्युर्वादि
कृतानपक्षोपांशुत्वविधिरत्रत्वीकर्त्तव्यः नन्वस्तुतदेवंतथास्यविधेःप्रकृतिसंबन्धयप्रयुक्तमप्रवेविधितमेवभ
तिनतुविकृतिविशेषान्वयप्रयुक्तंनियमविधितमपिप्रकृतिप्रकरणाप्राप्तस्यप्रकृतिविकृतिसाधारणाभा
वात्॥प्राप्ताविकृतिसाधारणत्वादितिचेत्॥सत्यमुपदेशतस्तथैवअतिदेशतस्तद्रूपकारमुखेनांगवदंगशास्त्रा
णामपिविकृतिप्राप्तौविकृतिविशेषप्रतिपद्यमानस्यास्यविधेर्नियमविधितमापत्तेःकेनवार्यते॥योहिसार्थो

दिषुविकृतिधर्मिनिकर्त्तव्यतांकांक्षयाप्रकृतिवच्छब्दःकल्प्यइत्युच्यतेसएवदर्शादिशब्दोविकृतवाक्यशेषतामापन्नःप्राकृतं
गशास्त्रसमूहःसएवलाघवार्थंप्रकृतिवदितिसंग्रहेणनिर्दिश्यते॥तस्यस्वरूपतःकृत्स्नेनापितत्रदृष्टादृष्टोयका
रकाविपदयोगस्यैवैक॥तेविधिवाक्यशेषतायाश्चकल्प्यत्वेनकल्प्यत्वपदेशः।अतएवोक्तंतत्रैव॥समिधोय
जतीत्रीहीनवहंतीतिप्रकृतावयमर्थःसमिदुपक्रमोवधतंडुलीकृतव्रीहीसंपादितपुरोडाशसाधनकश्चदर्शो
नकार्यतइतितत्रश्यसौर्योपितदङ्गकर्त्तव्यइत्यत्रसमिदुपक्रमोवधानतंडुलीकृतव्रीहिसंपादितचरुसाच
नकश्चश्यसौर्यकार्यइत्यत्रसवतीतत्रश्यसमिदादिशास्त्रंसौर्यशास्त्रस्यवाक्यशेषःसंपद्यते॥अनेनाभिप्राय
ण।भाष्यकारेण।पौरोडाशिकंआस्रणसौर्यादीनांवाक्यशेषइत्युक्तमध्याहृत्यभाव्यवहितकल्पनाज्ञायसीचे
तियद्येवमपिप्रकृतिवच्छब्दप्राकृतागशास्त्रसमूहादन्यएवसमानार्थकःकल्प्यशब्देनतुसएवान्यत्रनिवेश
स्य॥शब्दस्यमुखेनाप्यन्यत्रान्वयासंभवादितिविचिकित्स्यतत्रायंतंभागस्वरविधिराश्रयभेदरहितः
पूर्वनियमविधिलक्षणसंकर्यंनभवतिदाहरणं॥कृताश्रयभेदपेक्षोपर्यंसहितापूर्वनियमविधिसंकर्य
॥तेथाहिप्रकृतौदर्शादीनामंगेषुबाधकबाधनेनप्रकृतिविशेषकरोतियज्ञभागस्वरविधिरत्युक्ते
पुत्रप्राचीनपादार्थकृत्तेषुप्रकृतेनप्रवृत्तिविशेषकरयाजुर्वैदिकस्तोपाधिकेनवेदस्वरविधिनैवतेषुउषां

शुलानुष्ठानसिद्धेकिंतुवेदांतरविहितविकृतिगतेषुउषांशुलप्रधानेनयजुर्वेदवेदांतरविहितविकृतिगतेषुत
न्नियमनचसफलइतिव्याप्रवृत्तिविशेषकरप्राप्तिपूर्वकप्राप्तिनियमयोरिदमुदाहरणंस्यात्।ननुविकृतिगतेषा
पिकर्मसुस्वरप्राप्तिनियमनाभ्यांनप्रवृत्तिविशेषलाभःकर्मसुसाक्षात्सरस्यानुष्ठानुमशक्यत्वात्॥सत्यंतत्राप्य
ततःतदंगमंत्रावतरणेनसफलता॥अतएवप्राग्वेदंयजुर्वेदविहितासुविकृतिषुनियमविधिरूपयज्ञभा
गस्वरविधिमुदाहृत्यतत्रप्रवृत्तिविशेषकरनियमपूर्वकप्राप्तिर्नियमपरिसंख्याप्रदर्शिताः॥तदेवमाश्र
यभेदेससतिचविधिलक्षणानामाश्रयभेदेपौर्वापर्यंयथायोश्रसतोरसतोस्तत्फलानांसंकर्यस्यचकुल
मुपलंभात्॥तथैवप्रागुदाहृतेषुरथंतरसादिविधिघटकानेकविध्येप्रवृत्तिभ्योविधिनियमादिलक्षणसंकरो
नदोषायेत्याह॥यत्रैकानेकविध्यप्रवृत्तिमुखतयासंकरोलक्षणानामिष्यतान्यत्रयत्रप्रथमचर
मताचयुतसंकर्यनेत्यादेस्तादन्योपिदंडुःप्रकृतिजुषिभवेत्प्रेषकार्यप्रशास्तुःस्यायस्तेस्तोत्रसाम्नाकृतुनि
करजुषामुत्तरासुचवर्गानांसत्समेकानेकविध्यप्रवृत्तिभ्यांलक्षणसंकरोवगमेरथंतरएष्वादिनियमवि
धिघनिष्टनापाद्यतइति॥क्वचित्क्वचिदनिष्टमप्यापद्यते॥तथाहिदंडीप्रेषामन्त्राहत्यत्रैतद्विधिमात्रा प्रवृत्तौ
परिसंख्यालक्षणंप्रवर्त्तते॥तदाहिऋतेसोमेमैत्रावरुणायदंडंप्रयच्छतीतिविधिनामैत्रावरुणार्थेतेनसि

ध्यस्यदीक्षितदंडस्यप्रयोजनाकांक्षायांतदीयानिदंडापेक्षाणिसर्वाणिकार्याणिसमुच्चिंयप्राप्नुवंति॥क्रीतेसोम
इत्यादिविधेरप्रवृत्तौनतल्लक्षणंप्रवर्त्तते॥तदादीक्षाकृत्स्नदंडस्यावदीक्षानुवृत्तिरीक्षितेनैवधारणीयतया प्रा
प्तेः॥किंतुतदानियमविधिलक्षणंप्रवर्त्तते॥स्थितौचैरनवानेकर्त्तव्यप्रेषानुवचनेकिंचिदालंबनस्यप्राप्तः
ततश्चतत्रहिधिमात्राप्रवृत्यपेक्षयोनियमविधिलक्षणानुगमनेनिरूढपशापरिसंख्यालक्षणानुगमने
दीक्षितदंडएवप्रेषानुवचनेयोजनीयः॥क्रीतेसोमइतिविधेरप्यप्रवृत्यपेक्षयानियमविधिलक्षणानुग
मनेनिरूढयज्ञाविवादेस्वयंक्षावपिदीक्षितदंडान्यएवकश्चिद्दंडोयोजनीयःनचेतदुपपद्यते॥नचोभयम
पिविकल्पेनयोजयतुशक्यमितिवाच्यं॥वस्तुतःक्रीतेसोमइतिविधेःसहेवनतद्दंडान्प्रेत्यावरणार्थेवेनसं
ध्यस्यप्रयोजनाकांक्षस्यदीक्षितदंडस्यैवतत्रयोजनीयत्वात्॥ततस्तत्रतद्विधिमात्राप्रवृत्यपिक्रियापरिसं
ख्यस्यैवकेवलमेष्टव्येतितत्रक्रीतेसोमइतिविधेरप्यप्रवृत्यापेक्षयासमापतन्नियमविधिलक्षणसंक
ल्पमानिष्टमेव॥तथास्वयोनिषुगीयमानानांक्रतुसामान्नामकेसामात्वेक्रियतेस्तोत्रीयमितिविध्यनुसारेण
योग्निदेवत्यप्रउगानेकर्त्तव्येप्राप्तेयद्योन्यातदुत्तयोर्गीयतेतिवचनंक्वचिदुत्तरयोः॥प्राप्त्यर्थंकदाचित
योगंनमार्थमितिप्रागुक्तं॥तत्रैकंसामेतिविधेरप्यवृत्तौयद्योन्यामितिवचनंक्रतुसामान्यतद्योनेसाग्निदे

३८

तरयोरेवगानप्राप्तेर्थमितिप्रसज्येत॥नचैतदिष्टंवस्तुतस्तत्रगानप्राप्तकविधिबलाद्यद्योन्यामितिविधान
स्ययोनेरनाग्नेयक्रतुसामान्नामुत्तरयोरपिप्राप्तिनियमार्थत्वात्॥इदमुपलक्षणंज्ञेहिशास्त्रेष्वपणविध्याध्य
प्रवृत्यपेक्षायामवहननादिविधयोर्थकर्मविधयःप्रसज्येरन्नित्यादन्यपिदूषणानिदृष्टव्यानितस्मादाश्र
यभेदेनप्रथमंचरमभावेनान्यथाविधिनियमपरिसंख्यालक्षणफलसाकांक्षेयंवदकानेकविध्यप्रवृत्यपेक्ष
यातल्लक्षणसाकांक्षेणयुक्तमभ्युपगंतुमितितन्नहिध्यप्रदानापेक्षयैवलक्षणान्युपपादनेयानि॥ननुत
थासतिनियमपरिसंख्यालक्षणयोःस्त्रीहियवागादयादिशास्त्रेणव्याप्तिःस्यादितिचेन्॥किंनु
मःस्तंसप्राहार्थमेकानेकविध्यप्रदानापेक्षायांहिबलवंसनिष्टानिदर्शितानि॥तस्मादपूर्वविधिलक्षण
स्यस्वर्गकामवाक्यघव्याप्तिवनियमपरिसंख्यालक्षणयोरापतन्तदव्याप्तिरनिवार्यैवेष्यतासतिसप्तमी
पक्षेपिनमुक्तइतिभावः॥किंचाप्राप्तइस्यसतिसप्तमीपक्षेपरिसंख्यानिवर्त्तकेनलभ्यतइतिदूषणां
तरमाह॥किंचाप्राप्तेसतीतिप्रभवतिपरिसंख्यानवर्त्तिनेकर्त्तेनित्याप्राप्तात्रवर्तिघटयतिरवलुसाध्यत्र
कोवाविशेषः॥भावाप्राप्तिनिधात्मकविधिनिकरव्यापकाव्याप्तिदुष्टासत्यथेयंनिषेधश्रुतिमुखपरिसं
ख्याथसंतमप्राप्तामितरनिवृत्तिंप्रवयत्येव॥तथाचमामनंत्रज्ञानामनस्येसघ्राणिधानीमादनइति

परिविधिः प्राप्तविषयोपिगर्दभसनाभिरत्नौमंत्रमप्राप्तायांतस्यास्तत्प्राप्तिफलकोभवतीतिकृत्यं विषयसप्तमीपक्ष
इवसप्तमीपक्षेतत्प्राप्तिरप्राप्तिविशेषणेनलभ्येतनह्यपूर्वविधितः परिसंख्याविधेप्राप्तप्राप्तिफलकत्वा
स्तिकश्चिद्विशेषः॥नन्वयमस्तिविशेषः॥यत्परिसंख्याविधौनिवृत्तिरूपस्याभावस्याप्राप्तस्यप्राप्तिःफलंअपूर्वविधौ
तुभावस्यैवभावाप्राप्तिरेववेहा॥प्राप्तत्वेनेनविवक्षिता॥लोकेप्राप्तिशब्दस्यनिवृत्तिप्रतिपक्षयाचिवेनप्रसि
द्धतयाभावशब्दाप्रयोगेपतद्विषयत्वलाभादितिचेत्॥एवंसतिनिषेधालक्ष्येपुदीक्षितोनुजुहोतिनतौयशोकरो
तिनातिरात्रेषोउग्निरुद्धानीत्यादिसर्वंषष्ठपूर्वविधिष्वव्याप्तिस्यात्॥नेषेदीक्षामध्यपत्न्यतिरात्राद्यप्राप्तपु
रुषार्थंहोमाज्यभागयोउग्निनिरुद्धयादिरूपाभावप्राप्तिफलकत्वात्॥नचनिषेधाविधयेनभवतीतिवाच्यं॥
दर्शपूर्णमासिकेनान्तरंवदेदितिनिषेधासत्त्रेहोतेवविधित्वस्यव्यवस्थापितत्वात्॥नन्वनुवादप्रतियोगिविधि
र्हंतत्रतस्यव्यवस्थापितंतत्रहितस्यदर्शपूर्णमासप्रकारेणश्रुतस्यनान्तरंवदेदितिनिषेधस्यस्मृतिदृष्टपुरुषा
र्थनिषेधानुवादत्वमाशंक्यकर्तृवेगतेनान्तरंवदनवर्जनविधिरयंते॥नकर्तुमध्येन्तरंवदनेपुरुषार्थोनिषेधोऽति
क्रमात्प्रत्यवायवत्कर्तृत्वर्थेनिषेधातिक्रमात्॥प्रत्यवायवत्कर्तृत्वेथेनिषेधातिक्रमात्कर्तुर्वैगुण्यंचभवतीक्र
मे॥इहतुनिषेधप्रतियोगिविधिर्वलक्ष्यरूपेणतोनदव्यापनेदोषइतिचेत्॥मैवं॥इहाप्यनुवादप्रतियो

गिविधेरेवलक्षणत्वात्॥अपूर्वविधावुदाहरणेषुविधित्वसमर्थनायप्राप्यप्राप्तिविवेचनवद्भावाभावत्व
विवेचनादर्शनात्॥भवलक्षणविधिमुखप्रवृत्तापूर्वविधीनामेवात्रलक्ष्यत्वांगीकारेणकथंचिदव्याप्तिपरिहा
रस्तथायुक्तोविवक्षायांनिषेधमुखप्रवृत्तपरिसंख्यातिव्याप्तिरनिवार्य॥तत्राप्राप्तत्वेनप्रापणीयइतरानिव
र्त्तभीवरूपत्वात्॥यथाशंक्याप्रापणीयासंतिष्टतेनपत्नीःसंयाजयंतीतिअत्रप्रायणीयायाःप्रायंतेसमाप
नविधिनाततउदीच्यानांसर्वेषांमंगानामपक्रमेणप्राप्तेनपत्नीःसंयाजयंतीतिवचनंपत्नीसंयाजानेव
नकुर्यादंगांतरेणतुनकुर्यादितिपरिसंख्यारूपेणप्रायणीयायामंगांतरप्राप्त्यर्थंयथावाशंखमतौतेज
सद्रव्यशुधिप्रकरणस्मृतिकोछिभांडस्यसुरामद्यहृतस्यच॥त्रिःसप्तभाजीनाचुधिर्नतुक्रांस्यस्यताउप
नमितिअत्रमार्जनवतापनस्यविधानाभावात्सर्वेषांतेजसानांतापनाकरणेप्राप्तेनतुक्रांस्यस्येतिवचनंक्रांस्य
स्यैवतापनंनकुर्यान्यस्यतुकार्यमितिपरिसंख्यारूपेणतेजसांतरांणांतापनप्राप्त्यर्थंतथैवव्याख्यातमपरा
र्कैणा॥तेजसानांस्मृतिकोछिष्टादिरूपस्यैवापधातेयंवर्णादिनिरूपंवेशंतिक्लोमार्जनाचुधिर्नतुक्रांस्य
स्यतापनमर्थात्क्रांस्यव्यतिरिक्तस्यतापनमपिकार्यमितिगम्यतइति॥यद्यप्यत्राचादाहरणेवस्तुतःप
रिसंख्यानेष्यतेशेषंतत्संस्थायाःपरिसंख्यायाश्चविधिद्वयेनवाक्यभेदस्यतुल्यबलविधिद्वयप्राप्तयोःशं

यवेतसंस्थापत्नीसंयाजवत्तेकृत्स्नसंस्थयोर्विकल्पस्यत्राप्तविषयत्वेनत्रिदोषायापरिसंख्यायाश्चपरिहारा
यनपत्नीःसंयाजयंतीतिशेषवेतसंस्थाविधेरर्थवादः॥पत्नीसंयाजानुष्ठानलाघवेनतत्प्रशंसार्थइति
सप्तिडांतत्वेविकल्पस्यादितिदर्शमीकाधिकरणेनिर्णीतत्वात्॥तथापिपूर्वपक्षरीत्यातदुदाहरणं॥यत्रै
वविध्येतरशेषत्वेनसंभवतितत्रतदधिकरणपूर्वपक्षरीत्यापरिसंख्यैवावतिष्ठतइतितथाभूतमुदाहरण
मिहान्वेषणीयं॥प्रसिद्धाचान्यत्रापिननीलवसनंधार्यंनभस्यालेरनुत्सवइत्यादिष्वस्मृतिषुयत्तदर्थेदं
दत्तविष्णुमित्रनभोजनीयाउत्सवेष्वपि॥विष्णुमित्रानभोजनीयइत्यादिलोकव्यवहारेषुचविशेषनि
षेधयःशेषाभ्यनुज्ञापरइतिनिषेधमुखपरिसंख्याअतस्तत्रातिव्याप्तिस्यादेवेतिभावः॥एवमप्राप्तविशे
षणार्थविचारमुखेनलक्षणस्यदोषादर्शिताः॥अथात्यंतविशेषणार्थविचारमुखेनपितस्यदोषातद्द
र्शीयतेयेनातिव्याप्तिभंगःकिलनियमविधौकिंचिदासंनिकृष्टेसर्वोदृश्यानुवृत्तिर्यादिपुनरदृष्टाव्याप्त
यस्युर्विकल्पे॥प्राप्तोदृश्यैकदेशास्त्यपिवलुकुचिच्चरितार्थाभजंतःश्रूयंतेसार्वकाम्यप्रभृतिषुविध
यःस्तुत्याव्याप्तयस्युः॥११॥एनविशेषणेननियमविधौलक्षणस्यातिव्याप्तिनिरासोभिमतस्तदप्रा
प्तेप्राप्तेतिकृत्वेकिन्नाप्तयस्युश्चेतसर्वोदृश्यानुवृत्तिरप्राप्ते॥रात्रेतिकृत्वेवधातस्यचेनसर्वेषुवी

५०

हिषुप्राप्तिःकिंचिदृशेपूर्णमासप्रयोगयतेपुत्रीहिषुवधातस्यस्वनएवप्राप्तरन्येषुविदलनस्यप्राप्तिस्तेषव
तदप्राप्तिसत्वादिति॥एवेतर्हिप्रथमश्लोकेऽव्याप्तयःप्राक्समाहिताःपुनरपिविकल्पमुखेनोन्मज्जे
युःस्तथाहि॥सर्वोदृश्यानुवृत्तिरियत्रोदृश्यपदनप्रापणीयोदृश्यंविवक्षितंप्रकृतविधुदृश्यंवाअये
विषयसप्तमीपक्षेऽव्याप्तेवेकृताम्याधिविध्यव्याप्तेद्वितीयेसप्तमीपक्षेऽव्याप्तोविध्यव्याप्तेश्च
पुनरज्ञानात्तदृश्यनचितेचिन्वीतस्वर्गकामइत्यादिवाक्यैःस्वस्वोद्देश्येषुदृश्येषुस्वर्गादिषुश्येनादृश्यादि
गुणानांप्राप्तौसत्यामवस्वर्गादयुदृश्येनतेषामनुष्ठानेवैकृतप्रयोगमध्येप्रमाप्तमितिविकृतिघ्यादिपुनर्विधी
नांतत्प्रापणफलमित्यपेक्षयते॥एवमग्रतविध्युद्देश्येषुहादश्राहिकगवामयनीकेषुआघाद्यतीयहःसुप्रातानां
मेवाग्रतानांतद्विकृतिषुप्राप्तिर्विधिफलमित्यपेक्षयते॥तत्राविकृतिषुप्रापणीयानांश्येनादिगुणानांस्वस्वोद्देश्येषु
स्वर्गादिघ्रतानांचविध्यन्वितोद्देश्येषुहादश्राहिकगवामयनीकेषुहःरसुकृचिल्लाप्राप्तिर्नास्तिकृत्यंसास्वर्वत्रि
कीसमर्थ्यते॥स्यापेक्षेश्येकप्राप्तिमंतोपितदेकदेशांतरचरितार्थेः॥विधायोदृश्यते॥यथायेकान्येयान्यत्रकृतवः
कामायाहीयतेसर्वेभ्योज्योतिष्टोमःसर्वेभ्योज्योतिष्टोमदर्शपूर्णमासाविति॥अत्राज्योतिष्टोमदर्शपूर्णमासानां
स्वर्गार्थत्वेप्राप्तेस्विकविधिनाप्राप्तमितिकृत्वांतरघ्रवविधिचरितार्थोयथावाभ्युदयेष्टयोत्रेधातेदुलान्यंत्रिम

जेदितितंउलदधिश्रुतानांपूर्वदेवतापनयोवक्ष्यमाणदेवताभ्योसामान्यविभागोवामध्यमादिवाक्येस्तेषांदेव
तांतरविधानेनैवप्राप्तरतिउपांशुयाजाज्यएवविधिचारितार्थ्यं॥तथाहिविवाएतंप्रजापशुभिरर्द्धयतिवर्धय
त्यस्यभ्रातव्यंयस्यहविर्निरुप्तंपुरस्तात्चंद्रमाअभ्युदेतिसत्रेधातंउलान्विभजेरंध्रेमध्यमास्तानग्नयेक
त्रेपुरोडाशमष्टाकपालंकुर्याद्योस्तविष्टस्तानिंद्रायप्रदात्रेदधेश्वरूपेणिष्टास्तान्विष्णवेत्रिपविष्टायशि
पिविष्टायतेचरुमितिश्रूयते॥अत्रचतुर्दृश्यांममावास्यायांत्रीत्यादर्शपक्रमेहतवेतःस्तालायस्थितविधानेत्रेधातंउलान्
विभज्येदितितंउलानांमध्यमादिभावेनत्रेधाविभागोनविधीयतेयेमध्यमाइत्यादिवाक्येस्तत्सिद्धेः॥किंतु
सर्वेषांदार्शिकहविषांपूर्वदेवताभ्योपनयोविधीयते॥विभजेदितिक्तेस्वयमर्थोऽवगम्यतेयानिसंयुक्तानि
तानिविभजेदितितंउलादीनिहवींषिचदेवताभिःसंयुक्तानि॥अतस्तंउलाद्योविभागकर्मतेनार्थेप्राप्तदर्शी
कहविमात्रोपलक्षकइति॥तेषांपूर्वदेवतापनयोविधीयतइतियुक्तं॥अथवामनुः॥पुत्रेभ्योदायंव्यभजंदितिप्र
योगदर्शनादिहदार्शिकहविषांवक्ष्यमाणदाक्षायणादिगुणकाम्यादिगुणदेवताभ्योविभजनंविधीयते॥पू
र्वदेवतापनयस्त्वर्थसिध्यइत्येवमस्यवाक्यस्यार्थहेयंभाष्यकृत्प्रकिटयोदीर्शितं॥तत्रार्थहेयपितंउलदधिश्रु
तेषुनविधेश्चारितार्थ्यं॥देवतांतरसंयोजनेनपूर्वदेवतायनयस्यविशेषतोविभजनेनसामान्यविभागस्या

व्यर्थप्राप्तत्वात्॥किंतुतंउलशब्देनदर्शिकहविर्मात्रोपलक्षकेनलक्षमाणेउपांशुयाजाज्येतस्यचारितार्थ्यं॥उपां
शुयाजाज्यस्यायंदेवतांतरसंयोजनाभावेनपूर्वदेवतापनयस्यैयेपूर्वदेवतायाअपनयान्देवतांतरस्यचापिधा
नं॥देवतामंतरेणयजुर्मात्रस्यैवात्उपांशुयाजस्यलोपः॥सामान्यविभजनपक्षेउपांशुयाजाज्यस्यापिसामान्ये
नवक्ष्यमाणदेवताभ्योनिर्दिष्टत्वात्॥अंतरंदेवतांतरविशेषस्यचानिर्देशाद्वक्ष्यमाणाभ्यःसर्वाभ्योदेवताभ्योविभ
ज्यदातव्यमितिचाप्युपदीक्षयोः॥उपांशुयाजेवचनाच्यथाप्रकृतौस्तदधिकरणेबटुकचक्राह्मणानुसा
रेणमावास्यायामुपांशुयाजास्तावन्मात्रेसानिरूपितेतंउलशृतसान्नाय्येघपिपूर्वदेवतापनयस्सा
मान्यविभागोनार्थसिद्धोत्रेधातंउलानियत्रतदन्यतरविध्यभावेदार्शिकहविषांप्राकृतदेवताभ्यःदेवता
विशेषाकांक्षाविरहेणमध्यमादिवाक्यानितेषांपूर्वदेवताविशेषसंयोजनपराणीत्यत्रनिर्णायकाभावात्प्रा
प्तं॥नहितदामध्यमादिशब्दानांप्राकृततंउलादिपरत्वेनियमकमस्तीतिचेत्॥नायंशब्दोपबंधलात्तंउला
नांप्राकृतानांग्रहणंतत्समभिव्याहृतदधिश्रुतयोपरिप्रकृतयोर्ग्रहणमितिकल्पतेः॥नचानपेक्षोसंपू
र्वदेवतानांतेषांदेवताकांक्षाविरहेणतत्संयोजनानुपपतिः॥पूर्वदेवतापनयोकांक्षाविरहेपितदपनयस्य
देवतांतरसंयोजनस्याकांक्षाविरहेपितत्संयोजनस्यक्वचनचलाद्युपपतेः॥सामान्यतोविभजनपक्षे

विनैवपूर्वदेवतायनयंदेवतांतरसंयोजनस्यतत्रैवपूर्वदेवतायस्यार्थसिध्यतायाश्चसंप्रतिपत्तेश्च॥अतस्त्रै
धानंदुलोनीतिविधेरदृश्येकदाप्यवचरिताप्ये॥तस्मात्सर्वोदृश्यानुवृत्तप्राप्तिरहितेषुदाक्षत्तविधिघव्याप्ति
स्यादित्यर्थःस्यात्सर्वोदृश्यव्यक्तोसर्वात्मनानुवृत्तिस्तुद्रव्यापिवरूपाएवंचसार्वकाल्यविध्यादिषुनाव्याप्तिः॥
तेषुस्वर्गीतिलक्षणेलोपोजुयाजद्रव्यादिरूपाकेचिकिचिदुदृश्यव्यापकाप्राप्तिःसत्वात्॥नापिनियमव्यावृत्ता
भानियमविधोकेचिदप्युदृश्यव्यापकाप्राप्तेरभावात्॥सर्वेषांदार्शिपूर्णमासिकेषुत्रीहिष्वाक्षणादवह
नस्यपाक्षिकप्राप्तिसत्वात्॥नहित्रीहीननवहतीतिनियमेविध्यभावेकेषुचित्त्रीहिघवहननंकेषुचिद्दृ
लनादिकेचव्यवस्थितमाक्षेपतेः॥प्राप्यतेयेनकेचिदप्युदृश्येतदप्राप्तिर्व्यापिकास्यात्॥किंनुसर्वेषांत्री
हिघवहननेतरेतुष्यंकार्यंविदलनादिनावेतितदुभयमपिपक्षेप्राप्यते॥नचैकश्चोभयानुष्ठानस्यविरुध्य
तउभयोःप्राप्तिर्नास्तीतिशंकनीयं॥नहिप्राप्तिर्नामानुष्ठानमेवस्यात्सतिकेचिद्दर्शपूर्णमासप्रयोगज्ञोते
नविदलनस्याघनुष्ठानेनियमविधिविरोधापतेः॥किंतुनियमविध्यभावेलोकसिद्धेतुष्यंकरणता
तरद्यमवहननंविदलनादिकंचानुष्ठीयेतेसेवमनुष्ठानतत्कारणमात्रप्राप्तिः॥तत्रैकस्यापिनपिरुद्धंनय
विरोधेविनियमविध्यभावेपिकेचित्प्रयोगेऽवहननंप्रयोगांतरेविदलनादिकंवानुष्ठीयेतेसेवतत्कःप्रव

४२

र्तयितुंनियंतुंशक्यते॥केचित्प्रयोगाविशेषेपिबाधिकेनियमशास्त्राभावेहित्रीहवहननेविदलनादिकंवानुष्ठीये
तेसेवमपितत्कृतनिसंभावात्॥तस्मादुक्तविवक्षायांनकश्चिद्दोषइत्यतआह॥उद्देश्यव्यापिकासायदिभव
तितदाप्यादिमानाव्याप्तिरवेधस्यादव्याप्तिश्चागवामयविनिकर्षउद्देश्यसामोविधानेऽन्यार्थेप्रापणेचनि
यमरहणयोरप्यतिव्याप्तिरितश्चैत्रैकालिकत्वंननुविधिरपायादपवादस्तथास्यात्॥एवंविवक्षायामपिप्रथ
मश्लोकोक्तातिविध्यादाव्याप्तिपुनरुन्मज्जनरूपःप्रागुक्तदोषःस्यादेव॥तदुदाहरणेषुकस्मिंश्चिदपितत्तदुद्देश्ये
ऽप्रादुर्भावात्॥अन्यत्रचाव्याप्तेरधिकारस्यात्॥तथाहिद्वादशाहेषडहउक्थ्यसंस्थःसचैकमपरंतरंद्व
हद्वंतरंसामकार्यइति॥तेनगवीनयनिकर्षउद्देश्यंद्वहद्वंतरेएवषडहसामनी+तद्व्यरूपवैराजशाक्वररैव
तान्यषडहस्तोमसाधनसामनांपसर्जनत्वंसमाहारंगवामयनेपुनःश्रयतेषडहोवै+इतिवैरूप
दानिनिवर्तते॥ततश्चषडहेनद्वहद्वंतरविधौआद्यस्यस्तोमंतरसामयहितीयस्यचरुत्सामस्तोमयहाद
शाहिकषडहेकदाप्तिहापिप्राप्तमित्युद्देश्यव्यापकाप्तेरभावाद्व्याप्तिः॥नन्विहैकस्यांद्वौवृहद्वंतरसाम
त्वविधीयते॥संशयउभेकार्यातंगोसवउभेकार्यादिमादोयथानतुक्वचिदप्यहनिनप्राप्तमितिचेत्॥नप्रकृतौ
बृहद्वंतरयोःपरस्परनैरपेक्ष्येणषडहस्तोत्रसाधनत्वातयेचप्रकृतनैरपेक्ष्येबाधनंकचिद्बृहत्कचिद्रथंत

रमितिविधानोपपत्तेः तद्बाधनायोगात्॥ नचवाच्यंबृहद्रथंतरंचबृहद्रथंतरेसामनीअस्येतिबृहद्रथंतर
सामेतिद्वंद्वगर्भोबहुव्रीहिरस्तुतत्र्यवहारगतसाहित्यबलादेकस्याहउभयसामत्वविधेयमितिवक्तुंयुक्तं
सामासंबृहत्सामस्यरथंतरसामस्येत्यनेकपदबहुव्रीहिस्वीकारसंभवात्॥ नचद्वंद्वतत्पुरुषयोरुत्तरपदेनिर्दे
समासवचनाभावात्कालायनवचनादिहद्वंद्वसमासेनियतइतिवाच्यं॥ यत्रसतोर्द्वंद्वतत्पुरुषयोरन्यछंदरूपम
सतीश्रान्यतरवतितत्रसमासहृतरूपनियमार्थंतद्वार्त्तिकप्रवृत्तेः॥ यथावाक्षुचिप्रियःपंचगवधनइतिअत्र
हिद्वंद्वतत्पुरुषयोरुत्तरपदेद्वंद्वोदपहोतात्समाहारइतिगोरनधिकरणलुकीतिचसमासोनप्रत्ययोरप्राप्तेर्वाक्षु
चिप्रियःपंचगोधनइतिरूपंस्यात्॥ इहतुद्व्यादिरूपसामेदाभ्यायतोर्थेनिर्णीतेत्रयेप्रसक्तेप्राप्तिचारुकानु
ग्रहायानेकपदबहुव्रीह्याश्रयणमेवयुक्तं॥ यद्यपिद्वंद्वगर्भोएवात्रबहुव्रीहिस्तथापिप्रकृतितःप्राप्तेर
पेक्षेषउहापेक्षयासाहित्यस्यार्थेप्राप्तस्यतद्विषमयोपपत्तेः॥ अन्यथाबृहद्रथंतरयोःषउहसंबंधस्यतयोरे
केकस्मिन्नेवाहनिसाहित्यस्यचविधेयत्वेबृहद्रथंतरेएवास्यषउहस्यसामानीतेचैकस्मिन्नहनिपरस्परसहि
तेकर्त्तव्येइत्यनेकार्थविधानेनवाक्यभेदप्रसंगात्॥ नह्यत्रसप्तवादिवत्रोदकप्राप्तयोर्बृहद्रथंतरयोःसाहित्य
मात्रविधानंतथैवचंद्यवस्थापितंपृष्ठस्यस्तोमेपद्विधेरेकाहवद्विसासामत्वमितिदाक्षायणाधिकरणे॥ तत्त्वे

केकस्याहएकैकसामविधानंतथापिबृहद्रथंतरसामेतिपादक्रमादाद्यस्याह्नोबृहद्वितीयस्यरथंतरमित्यनेनक्र
मेणबृहद्रथंतरसामत्वंविधेयंनतुकेचिदपिनप्राप्तमितिद्व्यव्यापकप्राप्तिस्तीतिचेन्ना॥ प्राकृतप्राप्त्यबाधेना
द्याह्नोरथंतरंद्वितीयस्यबृहदितिनेनक्रमेणविधानेसंभवत्यलाघवपूर्वंनिर्देशार्थतयान्यथासिध्येनबृहद्रु
द्रथंतरयादक्रमेणप्रकृतिप्राप्तबाधनायोगात्॥ जगतीवैछंदांसिप्रत्यवरोहंतिआग्नेयंग्रहंबृहत्पृष्ठ्य
मितिगवामयनस्योत्तरेपक्षसिषउहिकस्यपंचमस्याह्नोबृहत्पृष्ठत्वलिंगेनाद्यस्यरथंतरंद्वितीयस्यबृहदि
त्यादिक्रमस्यैवनिर्णयाच्च॥ बृहद्रथंतरसामाकार्यइत्यादिविधेश्चयोहिगवामयनस्यपूर्वस्मिन्पक्षस्यचो
त्तरप्रकरणेनविरुद्ध्यंते॥ पूर्वस्मिन्पक्षस्यानुष्ठितास्त्र्यहंदोनीकृष्टसामस्तोमगणाउत्तरेपक्षसिप्रतिलो
म्येनानुष्ठेयाः॥ प्रत्यवरोहिणोमासाभवंति॥ उत्तरपक्षस्याद्यागणइत्यादिदर्शनात्॥ ततश्चयदिपूर्वस्मिन
पक्षस्ययुग्मस्याह्नोरथंतरंयुग्मस्याह्नोरथंतरंयुग्मस्यबृहदितिनियमास्यात्॥ तेदेवोत्तरेपक्षस्ययुग्मस्यपंच
मस्याह्नोबृहत्पृष्ठतादर्शनमुपपद्यते॥ तस्माद्बृहद्रथंतरसामाकार्यइत्यत्राद्यस्याह्नोरथंतरंद्वितीयस्य बृहदि
त्यादिक्रमेणैवषउहोद्देशेनबृहद्रथंतरसामत्वंविधीयते॥ तस्यचषउहरूपोद्देश्यव्यापकोप्राप्तिर्नास्तीतिअव्याप्ति
रनिर्वाच्या॥ अपिचोर्वाधिभिःस्वोद्देश्यविधेयस्याप्राप्तस्यप्रापणंक्रियमाणमपितत्राप्रवृत्तिविरोधकरत्वाद

न्यार्थवाच्यामितिनेनकस्यचित्प्रापणंनियमनंपरिवर्जनंवासमुदेतितेषांनवमश्लोकावतारिकोदाहृतानांमध्ये
यावन्यायेप्रापणंयंनियमपरिवर्जनविधीसान्नास्नुवीतयदिरथंतरसामासोमस्यादितिनयोर्विध्यतिक्रा
न्तिरप्येवंस्यात्॥विषयशुध्यर्थमन्यदपिनियमाविधिरूपमतिव्याप्तिस्थलमुदाहरीयते॥प्राजापत्यंवाइदमे
कआसीदित्यादिनाप्रजापतिसृष्टाग्निवाय्वादिसान्नत्वेनवेदानांप्रशंसयोपक्रम्यश्रूयतेतस्माद्ऋचःक्रि
यन्तेउपांशुयजुषाउद्गीथसाम्नेति॥अत्रोपक्रमोवेदानांप्रशंसयावेदविषयेकिंविधिरुतान्यतरत्यवगतमात्तद
नुरोधेनऋगादिशब्दाऋगादिप्रायऋग्वेदपराः॥तथाचाऋग्वेदनयक्रियतेविधीयतेतदुच्चैरित्यादिप्रकारे
णऋग्वेदादिविधयकर्मोद्देशेनोच्चैस्त्वादिविधयइतिस्थितमुपक्रमाधिकरणेकर्मसुचासाक्षान्निवेशमुच्चै
स्त्वादयोनलभंते॥अतस्तेतदंगमात्रत्वेवतरंतीत्यृग्वेदादिविधेयकर्मांगमंत्रणामनीयतस्वरप्राप्तौस्वरवि
शेषनियमार्थंएतेविधयःपर्यवस्यंति॥ततश्चैतेषुविधिषुविधेयानामुच्चैस्त्वादीनांपार्ष्टिकान्वयविषये
षुमंत्रेषुपार्ष्टिकप्राप्तिसत्वेप्युद्देश्येषुकर्मसुक्रयमपिप्राप्यभावान्नेदमपिलक्षणस्यातिव्याप्तिस्यात्॥ननुकर्मो
द्देशेनोच्चैस्त्वादिविधयोऽप्राप्तविषयत्वादपूर्वविधयएवयुक्ताःक्रयमतिव्याप्तिरितिचेत्॥उच्यतेयत्रयद
नुष्ठानंयस्यविधेःफलंनत्रतदनुष्ठानप्राप्यप्राप्तिविवेचनेनेवनियमापूर्वविधिरेवव्यवस्थाकार्य॥ननुय

त्रयज्ञेषत्वेविधिर्बोध्यंतस्यतज्ज्ञेषत्वेप्राप्तप्राप्तिविवेचनेन॥तथासत्यवघातगतापूर्वीयत्वशेषत्वाप्राप्त्या
तद्विधेरप्यपूर्वविधित्वप्रसंगात्॥नाहतत्रादृश्यतावच्छेदकावच्छेदेनाप्राप्तिरितोदृश्यस्वरूपएवाप्राप्तिरिते
ताक्रियाद्देशोस्ति॥विविक्षितरूपभेदनीयेताप्राप्तेरुभयत्राप्यविशिष्टत्वात्॥नचाक्रियापिरूपेणप्राप्तभाव
एवायंताव्याप्तिः॥स्वर्गादिगतयागकार्यत्वादर्शसामान्यतोदृष्टानुमानाप्राप्तिसंभवेनतत्रापूर्वविध्यभा
वापत्तेः॥ततश्चयथापूर्वयोर्देशेनावघातविधानेपिव्रीहिष्ववघातानुष्ठानमेवविधेःफलंनतुपेक्षप्राप्यतद्
तिनियमविधिराश्रितः॥एवमीहरग्वेदादिविधयकर्मोद्देशेनास्वरादिशेषविधानेपितदंगमंत्रेषुस्वरविशे
षानुष्ठानमेवविधेफलतश्चपक्षेप्राप्यतेइतिनियमविधेरेवाश्रयतुमुक्तं॥अनेनैवन्यायेनपूर्वोदाहृतविधी
रपिनियमपरिसंख्यातमुपपादनीयं॥ननुगुणमुख्यव्यतिक्रमेतदर्थत्वान्नुखेनवेदसंयोगइत्यधिकरणेभा
ष्यकारेणयाजुषेदिकस्याधानस्यसामवेदेवारवंतीयमंगंविहितंतत्रवारवंतीयस्यकिंस्वविधिनिवेधनं
सामवेदिकमुच्चैस्त्वंकार्यमुतप्राधानविधि॥निवेधनंयाजुर्वेदिकमुपांशुत्वमितिसंदेहेप्रधानविधिनिवेश
नस्वरस्यप्रधानेकवाक्यतापेक्षतेनविलंबितत्वात्तदनपेक्षायाप्रतीयमानमुच्चैस्त्वंकार्यमितिप्राप्यस्वरा
ध्यासितं॥विलंबितप्रतीतिकमप्युपांशुंचप्रधानधर्मत्वाद्बलीयः॥प्रधानेसाक्षान्निवेशमशुभमानतयांग

वतीर्णमधिहितप्रधानस्यैवधर्मः॥अतोंगधर्मेमुच्चैस्त्वंबाधित्वाप्रधानधर्मउपांशुत्वंकार्यमन्यथाप्रधानवैरूप्या
पत्तेरिति।एवंचप्रधानकर्मोद्देशेनस्वरविशेषविधानान्नांनकेवलंतदंगमंत्रेष्वानियतस्वरप्राप्तिमस्कारवतो
यादिपुनर्ह्यावर्तनेनाप्राप्तप्रधानस्वरप्रापणमपिफलं॥अतश्चापूर्वविधित्वंयुक्तमितिचेत्।अस्तुनामैवंत
थापिनीयतस्वरप्राप्तिमन्मंत्रारंभेनियमविधित्वमपिवक्तव्यंविनिगमनावैरहादित्यनित्यानित्यौनिर्बा
धौवा॥नह्यवहननेनियमविधिरवनपरिसंख्येयत्रावहननियमस्यनिरूपणादिनिवृत्तिप्रसक्तपजीव्यत्वमि
वरशनादानमंत्रविधिःपरिसंख्येननियमविधिरित्यत्रगर्दभरशनानिवृत्तेरनन्यलभ्यमिववेहविधिरेवन
नियमइत्यत्रकेचिद्विनियमस्वांशहतयोरुपजीव्योपजीवकभावाभावात्॥द्वयोरप्यनन्यलभ्यत्वाच्च॥नचै
कस्यैवविषयभेदेनविधिनियमरूपत्वेकश्चिद्दोषः॥विधियेरूप्याभावेनपूर्वोक्तोदाहृतसार्वकामादि
वाक्यानांविध्यनुवादरूपत्ववेदतेषांविधिनियमरूपस्याप्युपपत्तेः॥अतएवप्रागाश्रयविषयभेदेनवि
धिनियमपरिसंख्यानोसंकरोदर्शितः॥स्यादेतन्माभूत्सर्वत्रदृश्येघनुवृत्तिरूपावासर्वात्मनाक्वचिदप्य
दृश्येनुवृत्तिरूपावासर्वोदृश्यानुवृत्तिरात्मनिकंतुत्रैकालिकंवत्रिकालायमप्रमाणोविधिरितिप्रसिद्धेरिति
चेदेवंसतिअपाद्यादपवादेविधिर्नस्यात्॥तस्यप्राप्तायोदितपुनःप्राप्त्यर्थत्वात्॥तथाहिकृकृलचरोःअप

णंश्रयते॥धेतेश्रपयतीतिनेदंअपूर्वंश्रपणंविधीयते॥किंतुदर्शपूर्णमासिकेश्रपणंविधितिरूपप्रयोज्ञना
भावेनवर्त्तमानंप्रतिसृयते॥अतःप्राकृताःश्रपणधर्माःकर्तृव्याइतिस्थापितंदर्शमे॥ननुतत्रप्रतिप्रस
वरूपस्यश्रपणविधेरपूर्वविधित्वंनास्तीत्यगीकृतंउपरीक्षायांतत्रत्यंकृतंसमाधातरंनैतदपूर्वविधि
दोषतः।प्रतिप्रसवमात्रेतुलाघवोद्यविहितंवरमिति॥सत्यमुक्तंतस्यश्रपणांतरनाविधेयमूसंतमनु
ष्ठितस्यविधीतस्यस्वध्यारोहणकल्पनागौरवात्॥किंतुचोदकानीतंतयास्वतएवस्वध्यारूढमथाभावा
न्निवर्त्तमानप्राकृतमेवश्रपणंविधेयमित्यत्रतात्पर्यं॥नतुनप्रतिप्रसवविधिरपूर्वविधिरित्यत्रतात्पर्यं॥
तद्भावेश्रपणस्याद्योधितस्यस्यसंभवेनतस्यापूर्वविधेयतभीतोवक्तव्यंस्यात्॥अन्यथानियमपरिसंख्या
धीतंतरतापत्त्याविधेरविध्यंगप्रसंगात्॥एवंपूषाप्रविष्टभागइतिपोष्णचरौचोदकतःप्राप्तस्यप्राकृतस्यपोषणस्य
प्रयोज्ञनाभावान्निवर्त्तमानस्यविधिरूपप्रतिप्रसवविधिः॥एतादृशाः॥प्राप्तस्यापवादेप्रसक्तेनदपवादार्थोविध
यः।एतेषुप्राकृतप्राप्तिसत्वेत्रैकालिकाप्राप्तिर्नास्तीत्यव्याप्तिः॥केचित्पुनःप्रसक्तिरूपस्यप्रागवस्थावादप्रसक्तेसंतिवि
धयःअपवादेषुप्रयाजानूयाजनिअपबर्हिषानुयाजतीत्यादयः॥तथाहिअवभृथस्तवतमेयीपवदपूर्वंतत्राप्य
स्तुमंतयाज्यभागौयजतेत्याज्यभागपुनश्रपणेनावभृथप्रयोगविधेःकृत्तोकारप्रकृताज्यभागेनेराकांक्षतया

चोदकस्यकल्पनीयत्वात्॥नचतत्रासुश्लोपेनस्याप्युभयसोमाद्यत्रवीरिसादियाज्यानुवाक्यामेरहस्यविधि
र्थोलिंगऋमाभ्यामेवमेत्रप्राप्त्य॥तदनुवादेनतस्याज्यभागविधिपरत्वात्॥एवंचाज्यभागविधिनाचोदकेन
ल्पनाप्रतिबंधतःप्रसक्तायांप्रयाजादिप्राप्तौनिवारितायांवह्निव्यतिरिक्तप्रयाजादिप्राप्त्यर्थमपवादेन
तिश्रपणेएतादृशेषनियमविध्यभावेवरुनविदलनादीनामाशुपादिवपूर्वतापराज्यभागादिविध्यभावप्रस
जादीनांचोदकाप्राप्तिभावेदितिभविष्यत्प्राप्तिसत्वेनत्रैकालिकप्राप्त्यभावाद्व्याप्तिः॥एवमथातोग्निमा
धेनानुयाजानांसादिविधिर्व्याप्तिः॥दर्शीतेहिनवमश्लोकावतारिकायामथातोग्निमित्यादिविधेरप
वादापवादत्वे॥तस्मात्रैकालिकत्वमित्यपिनयुक्तमितिभावः॥ननुनहिअपाशिकत्वमात्रेतिकर्त्त
व्यत्वं॥युज्यतेचनियमविधिव्यावृत्यर्थस्यतस्यतथानिर्वचनं॥नियमःपाक्षिकेसतीतिनियमविधिलक्ष
णदर्शीत्योक्ताह॥युज्येतापाक्षिकत्वंतदितियदिनिरूप्येतततप्राप्तिवेकथितत्वंकथंततश्चिका
व्याप्तिरिष्टेनयुक्ता॥सक्तावेदभेदंतदितितुनियमादितिप्रसक्तानिरास्यंतत्रोपायांतरंतद्विरहइतितयोर्ल्य
ल्यवेछेदभेदःयुज्येततथानिर्वचनंयदितत्प्रतियोगिपाक्षिकत्वनिरूप्येताप्राप्तिश्चावलवेपाक्षिकत्वमितिन
युक्तं॥पूर्वश्लोकयोर्दर्शीताभिःसार्वकाम्यादिविधिषुवरुत्रयंतरसामत्वविधौचाव्याप्तिभिस्ततोधिकालिः

प्रायुदाहृतेषुपदेशानिदेशाभ्यांप्रकृतिविकृतिसाधारणेषुदादशाहिकगवामयनिकाग्नेयत्वभागश्च
रविधित्वव्याप्तिभिश्चाक्रांतत्वात्॥स्यादेतदवेछेदंविनाप्राप्तिश्चावलवेनापाक्षिकत्वेसार्वकाम्यादिविधिषुस्वर्गादिवव
छेदनप्राप्तिस्तद्विरहरूपबाधवछेदनप्राप्तिरित्यवछेदभेदस्तावन्नाव्याप्तिरितिचेत्॥एवंतर्हिविशेषणफलोनि
यमविधिव्यावर्त्तनेनलभ्यते॥एकस्मिन्नपिज्योतिष्टोमादिकर्त्तव्येवह्न्यादिनामुपायांतरप्राप्त्यवछेदनाप्राप्तिस्तद्विरहा
वछेदनाप्राप्तिरितिप्राप्त्यप्राप्त्योरवछेदभेदमनादित्यर्थः॥ननुतथ्यवछेदभेदउपायांतरप्राप्तितद्विरहश्चिन्नवे
विशेषणंनिवेश्यते॥नयाचोपायांतरप्राप्तितद्विरहश्चिन्नावछेदभेदंविनाप्राप्तिश्चावलवेपाक्षिकत्वमितिपर्य
वसानादपाक्षिकत्वविशेषणानर्थक्यनियमविधिव्यावृत्यलाभः॥तत्रनिरूढपाक्षिकत्वसत्वात्॥सार्व
काम्यादिविधयनुगम्यतत्रोपायांतरप्राप्तितद्विरहश्चिन्नस्वर्गत्वतदितरफलबाधवछेदभेदेनवप्राप्त्यप्राप्त्ये
करंवितत्रयानिरूढपाक्षिकत्वाभावसत्वादतोनात्रकश्चिद्दोषइत्याशंक्याह॥नेहिन्नत्वंन्निवेश्यंयदिवलुप्त
दवछेदभेदेनतोनव्याप्तिः॥कार्यंपाउंयतुगमनवृहंत्यग्नितायानित्यः॥स्थानेवैकल्पिकोनिःक्रियतरुनि
यद्युपायांतरंणीतहार्च्यपाक्षिकत्वव्यतिरेकरहितं॥किंतुवैकल्पिकत्वंविवक्षयानियमविधिव्यावृत्ति
लोपेविकायादिनिविषयतयातन्नानिर्नलभ्यते॥तथाहियद्योन्यांनतुत्तरयोर्गायतीतिविधिर्योनिसमछंदस्क



योरन्तस्थोर्नियमार्थेऽरूपपादिते॥नवमश्लोकावतारिकायां॥अयं चकार्यनियमएव॥ऋचोःसामसंस्कार्ययोः
तत्कार्यत्वात्॥ततश्चोत्पायांतरप्राप्तिर्हिरहभिन्नकार्योत्तरप्राप्तिर्हिरहरूपावच्छेदभेदेनैवप्राप्तिश्चाबल
वमितिविशेषणाभावप्रयुक्तविशिष्टाभावरूपापाद्यैकत्वसत्वातेनाविशेषणेनास्यव्यावृत्तिर्नलभ्यतइ
तितत्राप्तिव्याप्तिस्यात्॥तथाप्रहतिरात्रेविकल्पितस्यषोडशिग्रहस्योत्तरेहद्विरात्रस्यगृह्यतइतिविधुतवि
धुतावशेषेनियमोप्युपायद्वयप्राप्तोनियमोनभवति॥षोडशीग्रहाभावेपिकतोरवैगुण्येषोडशीग्रहोप
देशोनिरर्थकस्यादितितत्सार्थकत्वायषोडशीग्रहसाध्यतयाकल्पनीयेफलभूम्नीतद्भावस्योपायांतरलाभा
वात्॥अतस्तत्रापिपूर्ववदतिव्याप्तिस्यात्॥ऋता-पेयादितिऋतुगमननियमेकदाचिदृतावनिष्पाद्य
नुपगमनमपिप्रायुयादितिनदर्थप्रवृत्तेः॥अनुपगमनस्योपगमनेपिप्रायुयादितिसाध्यपुत्रोत्पादनेप्रा
युपायांतरलाभावादतिव्याप्तिस्तथैव॥तथाज्योतिष्टोमेतिरहरुष्टंभवतिरथंतरंपृष्टंभवतीतिरहरुथंत
रसाधनकेपृष्टाख्येहविस्तोत्रेविहिते॥तयोस्तत्तत्रशास्त्राधिकारन्यायेनादृष्टार्थतयाप्रयाजानुयाजवद्विकार्य
योरपिवचनबलाद्विकल्पेनतुत्रीहियावादिवेदकार्यत्वात्॥अतएवव्रीहिधर्माणामवघात्तादीनांयवे
ष्विवरहरुधर्माणांरहतिप्रतुपमानेसमुद्रंमनसाध्यायेदित्यादिनाविहितानांरथंतरेवा॥रथंतरधर्माणांर ५८

थंतरप्रस्तूयमानेनेत्रेसमीनयेदित्यादिनाविहितानांरहतिवानसंकरः॥नेदेतदेकार्थेत्वादविभागःस्यादिति
नावधिकाधिकरणेप्रपंचेनव्यवस्थापितत्वात्॥ज्योतिष्टोमविकृतिषुचोपहव्यादिषुव्रतदृष्टनियमःश्र
यतेतत्रापितत्कार्यमदृष्टप्राप्तीतिरथंतरदृष्टस्योपायांतरलाभावादतिव्याप्तिः॥स्यादेतत्॥उपायांतरस्था
नेवैकल्पिकविशेषणंनिवेषयिष्यामः॥तथाचवैकल्पिकप्राप्तिर्हिरहभिन्नावच्छेदभेदेविनाप्राप्तिश्चाबलत्व
पाक्षिकत्वमितिपदयवसानादुदाहृतनियमविधिषुचाप्राप्तेरकृरूपपाक्षिकत्ववत्यानातिव्याप्तिरितिचेद
हिवैकल्पिकत्वपाक्षिकत्वानुपवेशरहितंनिवेक्तव्यं॥अन्यथाश्रयादिदोषापत्तेः॥ततुनसंभवतिविधि
सेतेनस्वरूपपाक्षिकत्वंविधिसिकतस्यपाक्षिकत्वापादकत्वमित्यादिरूपेणैवतस्यनिवेक्तव्यत्वादितिभाव
स्योदेतत्॥आवच्छेदभेदंविनेतिस्थानेआश्रयभेदंविनेतिकरिष्यामः॥ततश्चनियम्याप्राप्तेरकस्मिन्नाश्र
येप्राप्तिकरंवितथापाक्षिकत्वान्नियमविधिघटिव्याप्तिः॥नापिसर्वकाम्यादिविधिघव्याप्तिः॥नापिस
र्वकाम्यादिविधिघव्याप्तिः॥तेषुसर्वघपिस्वर्गोद्देश्यव्यक्तिभेदेनैवप्राप्तेरकरंवितत्वादित्याशंक्याह॥य
द्युच्येतोत्तरेणत्वधिकरणाभिधोप्राप्तिसमेलनंततत्रापिप्राक्षुपक्षेघपिसमुदयतोतावद्व्याक्रियेका॥का
ल्यंनैवोपहव्यप्रभृतिभृतिहविशेषयोर्बभणोक्तोवृतीकाधारमंत्रोत्तरमुरुवनियमातिप्रसक्तिस्तथास्यात्॥र्

र्थंविवक्षामप्यव्याप्तिरेकोदोषस्यात्॥अतिव्याप्तिरदोषःस्तथाहि॥उपहव्यनामवक्ताचाश्वःश्यावोदक्षिणेनिद
क्षिणोविधायश्रूयते॥सब्रह्मणेदद्यइतिताक्तेपयस्यक्तोरौदुंबरःसोमचमसोदक्षिणेनिदक्षिणोविधायं
श्रूयते॥सप्रियासगोत्रायब्रह्मणेदद्यइतिअत्रतुदक्षिणात्वेनविहितयोरश्वरमसयोःब्राह्मणःसंबंधःप्रा
प्तएवकिंत्वन्येषामप्यविज्ञातयोसंबंधःप्रसज्यतेतदर्थोब्रह्मसंबंधोप्राप्तेरनानब्रह्मसंबंधप्राप्तार्थमिदंवच
नंयतेनार्थादविगंतरेभ्यःतयोरपनीतत्वातेषामानातिर्विनेवभवतिसामाचुपायेःकारणीया॥तेदेतत्सर्वंधे
नुवद्यश्चदक्षिणेतितथासोमचमसोइतिचदर्शमिकाधिकरणयोः॥निरूपितं॥एवंचैकस्यामेवाश्वस्यक्तौ
चमसव्यक्तौचब्रह्मणःप्राप्त्यप्राप्त्योर्मिलनानद्विधोरव्याप्तिः॥तथाप्राजापत्येघृतेनिर्वपेच्छरत्कामःकपालमापु
ष्कामइतिइष्टिविशेषंविधायतत्सन्निधावाम्नायते॥ततस्तंब्रह्मणेपरिहरतीतिअत्रहविशेषस्यसर्वस्य
ऋत्विग्भ्योलक्षणायपरिहरणीयत्वेप्राप्तिकार्त्स्न्येनब्रह्मसंबंधार्थमिदंअतोत्रापिएकस्यामेवहविशेषस्य
कौब्रह्मणःप्राप्त्यप्राप्त्योर्मिलनाद्व्याप्तिः॥ननुत्रिधाप्रोक्षितेचतुर्धाकरणेचेतित्रिविधमपिहविःशेषं
ब्रह्मणेपरिहरणीयं॥तच्चसर्वंयुगपदेवपरिहरणीयं॥एकधाब्रह्मणउपहरतीतिवचनात्॥युगपदुप
हृतमपितत्सर्वंचोदकप्राप्ततत्तद्ऋत्विक्कालाभाबाधेनयथाकालमेवभक्षणीयमितिनिर्णीतं॥दर्शमेक

५८

ब्दलपेटिकायां॥ततश्चप्राशित्रेकार्त्स्न्येनब्रह्मसंबंधस्यप्राप्तत्वात्॥कथंतत्रविधानमितिचेत्॥माभूदितियो
चतुर्धाकरणार्थंचविधानमुपपद्यतएव॥तथाचप्रहरणीयस्यसर्वस्यकार्त्स्न्येनब्रह्मसंबंधविधिःसार्वका
म्यविधिःस्वर्गेइवाप्राशित्रेनुवादोभविष्यति॥तथाप्यव्याप्तिर्दोषोदुर्निवारएव॥एकैकस्यामेवेडाहविःशेष
स्यकौचतुर्धाकरणार्थहविःशेषस्यैकौचप्राप्त्यप्राप्त्योर्मिलनात्॥एवंसत्यव्याप्तेःसमर्थितत्वात्॥अतिव्याप्तिस्तूप
तीकादिनियमविधिषुकथंयदिसोमंनविंदेत्पतीकानिभिषुणुयादितिश्रूयते॥अथसोमालाभेसत्यभावेविधिरु
पःपतीकानांयागसाधनत्वविषयकोपूर्वविधिर्नभवतिकिंतुस्मृतिप्रमाणत्वाच्छिष्टाभावेनागमोन्यस्याभिष्टवा
दित्यधिकरणेकन्यायेननित्यस्यानित्यस्यप्रारब्धकाम्यचसोमयागस्यसोमाभावेपियथाश्रुताश्वश्यानुष्ठे
यतयाकर्मचोदनासिद्धेयस्मिंकस्मिंश्चिद्द्रव्येवश्यमुपदेयेतत्रापिसाम्नान्यंतत्रिकीर्षाहीत्यधिकरणेकन्यायेन
सोमविधानस्यापिकिंचिदनुग्रहसिध्येत्कतिपयसोमावयवानुप्रवेशोवितिसोमसदृशद्रव्यएवोपदेयेबहुषु
चसोमसदृशद्रव्येषुसुस्थनियमविधिरयंयःसोमलताया अभावेसोमजातिपरिछिन्नात्सकलावयवानुपा
दानमशक्यंसत्सदृशेषुपलाशादिषुकलानवयवानुपादानमिछतिसप्रतीकगतानेवोपादत्तेतिएवंनियमवि
धिरितिनिर्णीतंनियमार्थंपुनःस्मृतिरितितृतीयाध्यायाधिकरणेवचनाच्चान्यायोभवेदितिषष्ठाध्यायाधिकरणे

च॥अयंचसोमलतयासुसदृशानामन्येषांसत्वात्तेषांनैववदुवयवानुग्रहानुरोधेनप्रतिनिधितयाप्राप्तेरीषसो
मसदृशानांपूतीकानांनतुप्रतिकोटितयापाक्षिकप्राप्तिरहितानामेवविधिःअतएवोक्तंशास्त्रदीपिकायांमुरव्या
भावेप्रतिनिधेःप्राप्तिस्यांचास्त्यायांयावन्यायेनसुसदृशेनियंतुमुपक्रम्यतेगवादृचेनेनमंदसदृशाःपूती
कानियम्यंतेअतःनिधिः।नियम्यार्थमितिएवंपूतीकानामप्राप्तेःप्राप्तिकरंविलंबतत्वाभावादतिव्याप्तिः॥तथा
वायव्यपशौश्रूयते॥हिरण्यगर्भःसमवर्त्तताग्रेभूतस्याधारयतीतिअयंप्राजापत्येपूर्वाधारेमंत्रविनैभवति कि
वैदेउत्तराधारइतिनिर्णीतेदर्शमेहिरण्यगर्भेपूर्वस्यमंत्रलिंगात्॥उत्तरस्यवामंत्रार्थत्वादितिपूर्वोत्तरपक्ष
सूत्राभ्यां॥तत्रायंसिद्धांतन्यायश्चोक्तोमंत्रविधौमंत्रजन्यंनियमादृष्टमपेक्षणीयंअन्यथाश्रुतकल्पसह
त्रोपद्रष्टवचनादिभिरप्यनुष्ठेयार्थस्मरणसंभवेनमंत्रेनियमवैयर्थ्यात्॥तुतुनियमादृष्टप्रकल्पतोपूर्वाधा
रेनकृप्ते॥तत्रतस्यामंत्रकृतादिपूर्वाधारेमंत्रविधिपक्षेत्रैवतत्कल्पनीयमुत्तराधारेतुनतत्कृप्तं॥तस्यप्रकृतावं
पिसमंत्रवत्वात्॥अतकृप्तेनियमादृष्टेमंत्रविशेषमात्राभिधानेलघिस्तूत्तराधारएवमंत्रविधिमुत्कर्षति
उत्कर्षेचरीकायां।मंत्रेनियमादृष्टंकल्पनीयंपूर्वाधारोतनुकृप्तमुत्तराधारो॥तस्मिन्सतिकल्पयितुंनशक्य
तइतिएवंचात्रनियमविधिरेवांगीकृतेआधारमंत्रांतरविधौचोदकादिरूर्ध्वाधरइतिप्राकृतमंत्रस्यैवप्रा

प्तिरस्तिनविधेयमंत्रस्यैवप्राप्तत्वात्प्राप्तिः॥नचविकृतौमंत्रांतरविधानसमयेप्राप्त्यभावेपिप्रकृताविदूर्ध्वाध
रइति॥मंत्रविधानसामर्थ्यसंवैषामुपायांतराणांचपक्षेप्राप्तिरस्ति॥सैवअर्थतोविकृतावपिप्राजापत्यलिंगकस्य
मंत्रस्यप्राप्त्यभावात्॥नचलिंगमद्रव्यविशिष्टमितिभाष्येसमर्थितमितिवाच्यं॥तत्रहिविहिविनियोगनिर्वाहा
येद्रव्यंकृत्वेचिन्मंत्रोजायतेनतस्मिन्नपिस्रुक्प्रागेकवेनावस्थानंमंत्रांतरेवर्णितमूर्ध्वीत्येतावदुक्तं॥ननुहि
रण्यगर्भेत्यादेस्यतत्रस्वारसिकंलिंगंसमर्थितं॥नवातसमर्थनेनाक्यानस्यप्रजापतावेवरूढत्वात्॥प्रजापतिर्वै
हिरण्यगर्भःप्रजापतेरनुरूपत्वायेतिवाक्यशेषाच्चहिरण्यगर्भेपूर्वस्यमंत्रलिंगादितिसूत्रेकृतापिप्रजापतावेव
लिंगसद्भावस्योक्तत्वाच्च॥एवमन्येप्यूह्यंतादृशेपुनियमविधिरितिव्याप्तिरूह्नीया॥इयंचाव्याप्तिरतिव्याप्ति
श्चप्राचीनेष्वप्यायंतिकत्वनिर्वचनपक्षेषुसमाना॥तस्मादप्रास्यायंतिकत्वयोरनिर्वचनद्युक्तमूर्ध्वविधिल
क्षणं॥इतिश्रीमदहंतविद्याचार्यश्रीमद्रंगराजकुलजलधिकौस्तुभश्रीमद्दिव्यजिघ्रांघ्रिश्रीरंगराजाध्वरिचरस्
नोरप्रदीक्षितस्यकृतौविधिरसायनसुषुमोपन्यासपूर्वविधिलक्षणक्षेपःसमाप्तः॥ ॥७॥ ॥७॥॥
अथनियमविधिलक्षणमादिशति॥हेतुःकुत्रापिकार्यकचनतदुभयंकुत्रचिद्विधिप्रापतेविध्यस्पृष्टेनिमम्पे
क्षचिदुभयविधिपाक्षिकत्वेनदृष्टंतस्यैवप्रत्यनीकेक्वचिदपिकुत्रचिन्नाक्षिकत्वेनैवदृष्टंनानारूपंतद्विस्तोनिय

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

मविधिगतंदुर्ग्रहलक्षणेना॥नाना प्रकारस्तावन्नियमविधिर्दृश्यते॥ससर्वोपिनियमः पाक्षिकेसतीत्यनेनलक्षणेन
संग्रहीतुंनशक्यःतथाहि क्वचिदेकस्मिन्कार्यनियतानेकोपायप्राप्तावेकोपायनियमः॥यथाव्रीहीनवहंतीति क्व
चिदेकस्योपायस्यनियतानेककार्यप्राप्तावेककार्यनियमोयथायोन्यांतदुत्तरयोर्गोयतीति॥इदंत्वमत्रका
वतारिकायांमुपपादितं॥क्वचिदुभयनियमः॥यथायज्ञुर्योगृह्णातिप्रयोजेभ्यःस्तादिति॥इदमपितत्रोपपा
दितं॥ननुतैत्तिरीयायोन्यामित्यत्रापुभयनियमोलभ्यते॥तथाचकार्यमात्रनियमतदुदाहरणेतथाहि
स्तोत्रांगत्वेनावगतस्यसाम्नस्तच्चगानंनिर्वाहायतत्संस्कार्यत्वेनानियतानेकर्ग्द्वयप्राप्तौउत्तरयोर्नियमस्तथा
स्तोत्रांगत्वेनावगतयोर्द्वयोःसंस्कारकत्वेनानियतानेकसामप्राप्तौयोनिसाम्नोनियमइत्यपिसंभवतिस्तोत्रस्य
प्रगीतमंत्रसाध्यस्तुतिरूपत्वेनासामापेक्षावश्यंभावात्॥व्यूह्यसामापेक्षाभावेपिसामसाधारण्यंगमि
व्यंजकापेक्षावश्यंभावाच्चेतिचेत्सत्यं॥यत्रसाम्नइवर्चामपिस्तोत्रांगत्वंप्रकरणपाठादिनावगतं॥नतथैव॥
यत्रविहितविशेषर्कमंत्रादिपृष्टविधौसाममात्रस्यस्तोत्रांगत्वावगतौतत्प्रकरणपाठादिरहितापितत्संस्का
र्योयोनिः॥प्रकृतौबहुर्चेनवत्॥वैश्वदेवस्तोमेकपंचदशरथंतरयोनिवच्चसाम्नःस्तोत्रांगत्वंनिर्वाहायचयमपि
तदंगत्वमर्थादापद्यते॥तत्रतदुत्तरयोःप्रागवगतंस्तोत्रांगत्वंनास्तीति॥तंनिर्वाहायनियतसामप्राप्त्यभावा